# Shri Subrahmanya Matrikamalika Sahasranamastotram

# શ્રીસુબ્રહ્મણ્ય માતૃકામાલિકા સહસ્રનામસ્તોત્રમ્

## Document Information

Text title : subrahmaNya sahasranaama stotra and nAmAvaliH

File name : subrahmaNyamAtRikAmAlikAsahasranAmAvaliH.itx

Category : sahasranAma, subrahmanya, stotra, sahasranAmAvalI

Location : doc_subrahmanya

Proofread by : Srikrishnan

Description-comments : From skaanda mahaapuraaNa

Latest update : November 21, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 17, 2022

*sanskritdocuments.org*

# શ્રીસુબ્રહ્મણ્ય માતૃકામાલિકા સહસ્રનામસ્તોત્રમ્

ૐ શુક્લામ્બરધરં વિષ્ણું શશિવર્ણં ચતુર્ભુજમ્ ।
પ્રસન્નવદનં ધ્યાયેત્ સર્વવિઘ્નોપશાન્તયે ॥

ઋષય ઊચુઃ -
સર્વશાસ્ત્રાર્થતત્ત્વજ્ઞ સર્વમોક્ષાર્થસાધક ।
વયં ચાતિથયઃ પ્રાપ્તા આતિથેયોઽસિ સામ્પ્રતમ્ ॥ ૧॥

જ્ઞાનદાનેન સંસારસાગરાદુદ્ધરસ્વ નઃ ।
કલૌ કલુષચિત્તા યે નરાઃ પાપરતાઃ સદા ।
કેન સ્તોત્રેણ મુચ્યન્તે સર્વપાતકબન્ધનાત્ ॥ ૨॥

ઇષ્ટસિદ્ધિકરં પુણ્યં દુઃખદારિદ્ર્યનાશનમ્ ।
સર્વરોગહરં સ્તોત્રં સૂત નો વક્તુમર્હસિ ॥ ૩॥

શ્રીસૂત ઉવાચ -
શૃણુધ્વં ઋષયઃ સર્વે નૈમિશારણ્યવાસિનઃ ।
તત્ત્વજ્ઞાનતપોનિષ્ઠાઃ સર્વશાસ્ત્રવિશારદાઃ ॥ ૪॥

સ્વયમ્ભુવા પુરા પ્રોક્તં નારદાય મહાત્મને ।
તદહં સમ્પ્રવક્ષ્યામિ શ્રોતું કૌતૂહલં યદિ ॥ ૫॥

ઋષય ઊચુઃ -
સૂતપુત્ર મહાભાગ વક્તુમર્હસિ સામ્પ્રતમ્ ।
યદાહ ભગવાન્બ્રહ્મા નારદાય મહાત્મને ॥ ૬॥

શ્રીસૂત ઉવાચ -
દિવ્યસિંહાસનારૂઢં સર્વદેવૈરભિષ્ટુતમ્ ।
સાષ્ટાઙ્ગં પ્રણિપત્યેદં બ્રહ્માણં ભુવનેશ્વરમ્ ।
નારદઃ પરિપપ્રચ્છ કૃતાઞ્જલિરુપસ્થિતઃ ॥ ૭॥

નારદ ઉવાચ -

લોકનાથ સુરશ્રેષ્ઠ સર્વજ્ઞ કરુણાકર ।
ષણ્મુખસ્ય તુ યત્સ્તોત્રં પરમં પાપનાશનમ્ ॥ ૮॥

તાત ત્વં પુત્રવાત્સલ્યાત્તદ્વદ પ્રણતાય મે ।
ઉપદિશ્ય તુ માં દેવ રક્ષ રક્ષ કૃપાનિધે ॥ ૯॥

બ્રહ્મોવાચ -
શૃણુ વક્ષ્યામિ દેવર્ષે સ્તવરાજમિતં પરમ્ ।
માતૃકામાલિકાયુક્તં જ્ઞાનમોક્ષસુખપ્રદમ્ ॥ ૧૦॥

સહસ્રાણિ ચ નામાનિ ષણ્મુખસ્ય મહાત્મનઃ ।
યાનિ નામાનિ પુણ્યાનિ દુઃખરોગહરાણિ ચ ।
તાનિ નામાનિ વક્ષ્યામિ કૃપયા ત્વયિ નારદ ॥ ૧૧॥

જપમાત્રેણ સિધ્યન્તિ મનસા ચિન્તિતાન્યપિ ।
ઇહામુત્ર પરં ભોગં લભતે નાત્ર સંશયઃ ॥ ૧૨॥

ઇદં સ્તોત્રં પરં પુણ્યં કોટિયજ્ઞફલપ્રદમ્ ।
સન્દેહો નાત્ર કર્તવ્યઃ શૃણુ મે નિશ્ચિતં વચઃ ॥ ૧૩॥

ૐ અસ્ય શ્રીસુબ્રહ્મણ્યસહસ્રનામમાતૃકામાલિકાસ્તોત્રમહામન્ત્રસ્ય
બ્રહ્મા ઋષિઃ । અનુષ્ટુપ્ છન્દઃ । શ્રીપ્રસન્નજ્ઞાનસુબ્રહ્મણ્યો દેવતા ।
શરજન્માક્ષર ઇતિ બીજમ્ । શક્તિધરોઽક્ષય ઇતિ શક્તિઃ । કાર્તિકેય
ઇતિ કીલકમ્ । ક્રૌઞ્ચભેદીત્યર્ગલમ્ । શિખિવાહન ઇતિ કવચમ્ ।
ષણ્મુખ ઇતિ ધ્યાનમ્ । શ્રીપ્રસન્નજ્ઞાનસુબ્રહ્મણ્યપ્રસાદસિદ્ધ્યર્થે
જપે વિનિયોગઃ । કરન્યાસઃ -

ૐ શં ઓઙ્કારસ્વરૂપાય ઓજોધરાય ઓજસ્વિને સુહૃદ્યાય
 હૃષ્ટચિત્તાત્મને ભાસ્વદ્રૂપાય અઙ્ગુષ્ઠાભ્યાં નમઃ ।
ૐ રં ષટ્કોણમધ્યનિલયાય ષટ્કિરીટધરાય શ્રીમતે ષડાધારાય
 ષડાનનાય લલાટષણ્ણેત્રાય અભયવરદહસ્તાય
 તર્જનીભ્યાં નમઃ ।
ૐ વં ષણ્મુખાય શરજન્મને શુભલક્ષણાય શિખિવાહનાય
 ષડક્ષરાય સ્વામિનાથાય મધ્યમાભ્યાં નમઃ ।
ૐ ણં કૃશાનુસમ્ભવાય કવચિને કુક્કુટધ્વજાય શૂરમર્દનાય
 કુમારાય સુબ્રહ્મણ્યાય અનામિકાભ્યાં નમઃ ।
ૐ ભં કન્દર્પકોટિદિવ્યવિગ્રહાય દ્વિષડ્બાહવે દ્વાદશાક્ષરાય

નિત્યજ્ઞાનસ્વરૂપાય દ્વાદશાક્ષાય મૂલપ્રકૃતિરહિતાય
કનિષ્ઠિકાભ્યાં નમઃ ।
ૐ વં સચ્ચિદાનન્દસ્વરૂપાય સર્વરૂપાત્મને ખેટધરાય ખડ્ગિને
શક્તિહસ્તાય બ્રહ્મૈકરૂપિણે કરતલકરપૃષ્ઠાભ્યાં નમઃ ॥

અઙ્ગન્યાસઃ -

ૐ શં ઓઙ્કારસ્વરૂપાય ઓજોધરાય ઓજસ્વિને સુહૃદ્યાય
હૃષ્ટચિત્તાત્મને ભાસ્વદ્રૂપાય હૃદયાય નમઃ ।
ૐ રં ષટ્કોણમધ્યનિલયાય ષટ્કિરીટધરાય શ્રીમતે ષડાધારાય
ષડાનનાય લલાટષણ્ણેત્રાય અભયવરદહસ્તાય શિરસે સ્વાહા ।
ૐ વં ષણ્મુખાય શરજન્મને શુભલક્ષણાય શિખિવાહનાય
ષડક્ષરાય સ્વામિનાથાય શિખાયૈ વષટ્ ।
ૐ ણં કૃશાનુસમ્ભવાય કવચિને કુક્કુટધ્વજાય શૂરમર્દનાય
કુમારાય સુબ્રહ્મણ્યાય કવચાય હુમ્ ।
ૐ ભં કન્દર્પકોટિદિવ્યવિગ્રહાય દ્વિષડ્બાહવે દ્વાદશાક્ષરાય
નિત્યજ્ઞાનસ્વરૂપાય દ્વાદશાક્ષાય મૂલપ્રકૃતિરહિતાય નેત્રત્રયાય
વૌષટ્ ।
ૐ વં સચ્ચિદાનન્દસ્વરૂપાય સર્વરૂપાત્મને ખેટધરાય ખડ્ગિને
શક્તિહસ્તાય બ્રહ્મૈકરૂપિણે અસ્ત્રાય ફટ્ ॥

ૐ ભૂર્ભુવસ્સુવરોં ઇતિ દિગ્બન્દઃ ॥

ધ્યાનં -

ધ્યાયેત્ષણ્મુખમિન્દુકોટિસદૃશં રત્નપ્રભાશોભિતં
બાલાર્કદ્યુતિષટ્કિરીટવિલસત્કેયૂરહારાન્વિતમ્ ।
કર્ણાલમ્બિતકુણ્ડલપ્રવિલસદ્ગણ્ડસ્થલાશોભિતં
કાઞ્ચીકઙ્કણકિઙ્કિણીરવયુતં શઋઙ્ગારસારોદયમ્ ॥

ષડ્વક્ત્રં શિખિવહનં ત્રિનયનં ચિત્રામ્બરાલઙ્કૃતં
વજ્રં શક્તિમસિં ત્રિશૂલમભયં ખેટં ધનુશ્ચક્રકમ્ ॥

પાશં કુક્કુટમઙ્કુશં ચ વરદં દોર્ભિર્દધાનં સદા ।
ધ્યાયેદીપ્સિતસિદ્ધિદં શિવસુતં સ્કન્દં સુરારાધિતમ્ ॥

દ્વિષડ્ભુજં ષણ્મુખમમ્બિકાસુતં કુમારમાદિત્ય સહસ્રતેજસમ્ ।

વન્દે મયૂરાસનમગ્નિસમ્ભવં સેનાન્યમદ્યાહમભીષ્ટસિદ્ધયે ॥

પઞ્ચપૂજા -

લં પૃથિવ્યાત્મને ગન્ધં કલ્પયામિ ।
હં આકાશાત્મને પુષ્પાણિ કલ્પયામિ ।
યં વાય્વાત્મને ધૂપં કલ્પયામિ ।
રં અગ્ન્યાત્મને દીપં કલ્પયામિ ।
વં અમૃતાત્મને અમૃતં મહાનૈવેદ્યં કલ્પયામિ ।
સં સર્વાત્મને તામ્બૂલાદિ સર્વોપચારપૂજાન્ કલ્પયામિ ।

ૐ અચિન્ત્યશક્તિરનઘો હ્યક્ષોભ્યઃ ત્વપરાજિતઃ ।
અનાથવત્સલોઽમોઘઃ ત્વશોકો હ્યજરોઽભયઃ ॥ ૧॥

અત્યુદારો હ્યઘહરઃ ત્વગ્રગણ્યોઽદ્રિજાસુતઃ ।
અનન્તમહિમાઽપારોઽનન્તસૌખ્યોઽન્નદોઽવ્યયઃ ॥ ૨॥

અનુત્તમોઽક્ષયોઽનાદિરપ્રમેયોઽક્ષરોઽચ્યુતઃ ।
અકલ્મષોઽભિરામોઽગ્રધુર્યઃ ત્વમિતવિક્રમઃ ॥ ૩॥

અતુલશ્ચામૃતોઽઘોરો હ્યનન્તોઽનન્તવિક્રમઃ ।
અનાથનાથો હ્યમલો હ્યપ્રમત્તોઽમરપ્રભુઃ ॥ ૪॥

અરિન્દમોઽખિલાધારો હ્યણિમાદિગુણાગ્રણીઃ ।
અચઞ્ચલોઽમરસ્તુત્યોઽહ્યકલઙ્કઃ ત્વમિતાશનઃ ॥ ૫॥

અગ્નિભૂરનવદ્યાઙ્ગો હ્યદ્ભુતોઽભીષ્ટદાયકઃ ।
અતીન્દ્રિયોઽપ્રમેયાત્મા હ્યદૃશ્યોઽવ્યક્તલક્ષણઃ ॥ ૬॥

આપદ્વિનાશનશ્ચાર્ય આઢ્ય આગમસંસ્તુતઃ ।
આર્તસંરક્ષણશ્ચાદ્ય આનન્દી આર્યસેવિતઃ ॥ ૭॥

આશ્રિતેષ્ટાર્થવરદ આનન્દાર્થફલપ્રદઃ ।
આશ્ચર્યરૂપશ્ચાનન્દ આપન્નાર્તિવિનાશનઃ ॥ ૮॥

આરાધિતપદદ્વન્દ્વ આગમાર્થવિશારદઃ ।
આનન્દસુન્દરાકાર આબ્રહ્મસ્તમ્ભરૂપકઃ ॥ ૯॥

આધારષટ્કનિલય આદિમધ્યાન્તવર્જિતઃ ।
આબ્રહ્મકીટજનક આખણ્ડલસુધાદિપઃ ॥ ૧૦॥

ઇભવક્ત્રાનુજોઽપીષ્ટ ઇભાસુરહરાત્મજઃ ।
ઇતિહાસસુસંસ્તુત્ય ઇન્દ્રભોગફલપ્રદઃ ॥ ૧૧॥

ઇષ્ટાપૂર્તફલપ્રાપ્તિરિષ્ટેષ્ટવરદાયકઃ ।
ઇહામુત્રેષ્ટફલદ ઇષ્ટદઃ ત્વિન્દ્રવન્દિતઃ ॥ ૧૨॥

ઈડનીયઃ ત્વીશપુત્ર ઈપ્સિતાર્થપ્રદાયકઃ ।
ઈતિભીતિહરઃ ત્વીડ્ય ઈષણાત્રયવર્જિતઃ ॥ ૧૩॥

ઈશ્વરાર્પિતવેદાર્થ ઈશ્વરપ્રિયનન્દનઃ ।
ઈશ્વરાઙ્કવિહારી ચેશિતા ચેશ્વરરૂપધૃત્ ॥ ૧૪॥

ઉદારકીર્તિરુદ્યોગી ચોત્કૃષ્ટોરુપરાક્રમઃ ।
ઉત્કૃષ્ટશક્તિરુત્સાહ ઉદારશ્ચોત્સવપ્રિયઃ ॥ ૧૫॥

ઉજ્જૃમ્ભ ઉદ્ભવશ્ચોગ્ર ઉદગ્રશ્ચોગ્રલોચનઃ ।
ઉન્મત્ત ઉગ્રશમન ઉદ્વેગઘ્નોરગેશ્વરઃ ॥ ૧૬॥

ઉરુપ્રભાવશ્ચોદીર્ણ ઉમાસૂનુરુદારધીઃ ।
ઉદગ્રવૈભવોદગ્રબુદ્ધિદોગ્રહેતિમાન્ ॥ ૧૭॥

ઊર્ધ્વરેતસ્સુતશ્ચોર્ધ્વગતિદશ્ચોર્મિપાલકઃ ।
ઊર્જિતશ્ચોર્ધ્વગશ્ચોર્ધ્વ ઊર્ધ્વલોકૈકનાયકઃ ॥ ૧૮॥

ઊર્જાવાનૂર્જિતોદાર ઊર્જિતોર્જિતશાસનઃ ।
ઊરિકૃતધનુર્બાણ ઊર્મિષટ્કવિનાશનઃ ॥ ૧૯॥

ઋષિદેવગણસ્તુત્ય ઋણત્રયવિમોચનઃ ।
ઋજુરૂપો હ્યૃજુકર ઋજુમાર્ગપ્રદર્શકઃ ॥ ૨૦॥

ઋતમ્ભર ઋજુપ્રીત ઋષભો ઋદ્ધિશ્ચ ઋક્ ।
ઋગ્વેદાદિસ્વરૂપશ્ચ ઋદ્ધાત્મા ઋષિપૂજિતઃ ॥ ૨૧॥

ઌલેખવત્રિનાડ્યન્તસ્સુષુમ્નાનાડિમધ્યગઃ ।
ૠકૃત્સ્વપ્નાદ્યજાગ્રાન્તમધ્યો હ્યૃતમ્ભરાત્મકઃ ॥ ૨૨॥

ૡલિતોદ્ધારકો ૡબ્ધજનદૂરો ૡનામકઃ ।
ૡપ્તાચારમનોદૂરો ૡપ્તદુઃખો ૡળત્પ્રભઃ ॥ ૨૩॥

ૡનમાયાસુરો ૡનસંસારાખ્યમહાવનઃ ।
એણાઙ્કધરસત્પુત્ર એક એનૌઘનાશનઃ ॥ ૨૪॥

એકાગ્રધ્યાનશીલશ્ચાપ્યોકાન્તધ્યાનપૂજિતઃ ।
ઐશ્વર્યદશ્ચૈન્દ્રભોગી ચૈતિહ્યશ્ચૈન્દ્રવન્દિતઃ ॥ ૨૫॥

ઐશાનપદસન્દાયી ચૈન્દ્રદિક્પાલજાધિપઃ ।
ઓજસ્વી ચૌષધિસ્થાનમોજોદશ્ચૌદનપ્રદઃ ॥ ૨૬॥

ઓઙ્કારરૂપીચૌઙ્કાર ઓઙ્કારાર્થવિશારદઃ ।
ઔદાર્યશીલશ્ચૌમેય ઔગ્ર ઔન્નત્યદાયકઃ ॥ ૨૭॥

ઔદાર્યઃ ત્વૌષધકર ઔષધચ્ચૌષધાકરઃ ।
અંશુમાનંશુમાલીડ્ય અમ્બિકાતનયોઽન્નદઃ ॥ ૨૮॥

અન્ધકારિસુતોઽન્ધત્વહારી ચામ્બુજલોચનઃ ।
અસ્તમાયઃ ત્વર્પણાર્હઃ ત્વસ્પષ્ટોઽસ્તોકપુણ્યદઃ ॥ ૨૯॥

અસ્તામિત્રોઽસ્તરૂપશ્ચાપ્યસ્ખલદ્ગતિદાયકઃ ।
કાર્તિકેયઃ કામરૂપઃ કુમારઃ ક્રૌઞ્ચદારણઃ ॥ ૩૦॥

કામદઃ કારણં કામ્યઃ કમનીયઃ કૃપાકરઃ ।
કાઞ્ચનાભઃ કાન્તિયુક્તઃ કામઃ કામપ્રદઃ કવિઃ ॥ ૩૧॥

કીર્તિકૃત્કુક્કુટધરઃ કૂટસ્થઃ કુવલેક્ષણઃ ।
કુઙ્કુમાઙ્ગઃ ક્લમહરઃ કુશલઃ કુક્કુટધ્વજઃ ॥ ૩૨॥

કૃશાનુસમ્ભવઃ ક્રૂરઃ ક્રૂરઘ્નઃ કલિતાપહૃત્ ।
કામરૂપઃ કલ્પતરુઃ કાન્તઃ કામિતદાયકઃ ॥ ૩૩॥

કલ્યાણકૃત્ક્લેશનાશઃ કૃપાળૂઃ કરુણાકરઃ ।
કલૂષઘ્નઃ ક્રિયાશક્તઃ કઠોરઃ કવચી કૃતી ॥ ૩૪॥

કોમલાઙ્ગઃ કુહૂપ્રીતઃ કુત્સિતઘ્નઃ કલાધરઃ ।
ખ્યાતઃ ખેટધરઃ ખડ્ગી ખટ્વાઙ્ગી ખલનિગ્રહઃ ॥ ૩૫॥

ખ્યાતિપ્રદઃ ખેચરેશઃ ખ્યાતૈનાઃ ખેચરસ્તુતઃ ।
ખરતાપહરઃ ખસ્થઃ ખેચરઃ ખેચરાશ્રયઃ ॥ ૩૬॥

ખણ્ડેન્દુમૌલિતનયઃ ખેલાખેચરપાલકઃ ।
ખસ્થપ્રિયઃ ખણ્ડિતાઘઃ ખેચરીજનપૂજિતઃ ॥ ૩૭॥

ખેટાદ્યાયુધસમ્પન્નઃ ખર્વેતરપદપ્રદઃ ।

ગાઙ્ગેયો ગિરિજાપુત્રો ગણનાથાનુજો ગુહઃ ॥ ૩૮॥

ગોપ્તા ગીર્વાણસંસેવ્યો ગુણાતીતો ગુહાશ્રયઃ ।
ગતિપ્રદો ગુણનિધિર્ગમ્ભીરો ગિરિજાત્મજઃ ॥ ૩૯॥

ગૂઢરૂપો ગદહરો ગ્રહાધીશો ગણાગ્રણીઃ ।
ગોધરો ગહનો ગુપ્તો ગર્વઘ્નો ગુણવર્દ્ધનઃ ॥ ૪૦॥

ગુહ્યો ગુણજ્ઞો ગીતિજ્ઞો ગતાતઙ્કો ગુણોત્તરઃ ।
ગદ્યપદ્યપ્રિયો ગણ્યો ગોસ્તુતો ગગનેચરઃ ॥ ૪૧॥

ગણનીયચરિત્રશ્ચ ગતક્લેશો ગુહાશ્રયઃ ।
ઘૂર્ણિતાક્ષો ઘૃણિનિધિઃ ઘનગમ્ભીરઘોષણઃ ॥ ૪૨॥

ઘણ્ટાનાદપ્રિયો ઘોષો ઘોરાઘૌઘવિનાશનઃ ।
ઘનપ્રિયો ઘનાનન્દો ઘૃણાવાન્ ઘૃષ્ટિપાતકઃ ॥ ૪૩॥

ઘૃણર્ઘૃણાકરો ઘોરો ઘોરદૈત્યપ્રહારકઃ ।
ઘટિતૈશ્વર્યસન્દોહો ઘનર્દ્ધિર્ઘનવિક્રમઃ ॥ ૪૪॥

ઘૃણિમણ્ડલરૂપશ્ચ ઘનસમ્પત્પ્રદો ઘનઃ ।
ઙકારસ્વરણસ્સર્વરન્ધ્રસ્થત્રિપુટીપ્રભઃ ॥ ૪૫॥

ઙણદ્ઘણ્ટારવાન્તસ્થો ઙણારાવતતિપ્રિયઃ ।
ઙકારાકારકદ્વન્દ્વસર્વસન્ધ્યાપ્તચિન્મયઃ ॥ ૪૬॥

ચિત્રકૃચ્ચિત્રવર્ણશ્ચ ચઞ્ચલશ્ચપલદ્યુતિઃ ।
ચિન્મયશ્ચિત્સ્વરૂપશ્ચ ચિદાનન્દઃ ચિરન્તનઃ ॥ ૪૭॥

ચિત્રકેલિઃ ચિત્રતરઃ ચિન્તનીયઃ ચમત્કૃતિઃ ।
ચોરઘ્નઃ ચતુરઃ ચારુઃ ચામીકરવિભૂષણઃ ॥ ૪૮॥

ચન્દ્રાર્કકોટિસદૃશઃ ચન્દ્રમૌલિતનૂદ્ભવઃ ।
ચેટીભૂતપ્રપઞ્ચશ્ચ ચણ્ડશ્ચણ્ડોરુવિક્રમઃ ॥ ૪૯॥

છાદિતાઙ્ગશ્છદ્મહન્તા છેદિતાખિલપાતકઃ ।
છેદીકૃતમહાક્લેશઃ છેત્રીકૃતમહાયશાઃ ॥ ૫૦॥

છેદિતાશેષસન્તાપઃ છુરિતાનીકસાગરઃ ।
છેદિતાશેષદૈત્યૌઘઃ છાતૈનાશ્છિન્નસંશયઃ ॥ ૫૧॥

છન્દોમયશ્છન્દગામી છિન્નપાશઃ છવિચ્છદઃ ।
છેદિતાશેષસંસારઃ છવ્યગ્રીન્દુવિલોચનઃ ॥ ૫૨॥

જગદ્ધિતો જગત્પૂજ્યો જગજ્જ્યેષ્ઠો જગન્મયઃ ।
જનકો જાહ્નવીસૂનુર્જિતામિત્રો જગદ્ગુરુઃ ॥ ૫૩॥

જયી જિતેન્દ્રિયો જેતા જરામરણવર્જિતઃ ।
જ્યોતિર્મયો જગન્નાથો જગજ્જીવો જનાશ્રયઃ ॥ ૫૪॥

જગત્વન્દ્યો જગચ્છ્રેષ્ઠો જિતક્લેશો જગદ્વિભુઃ ।
જગત્સેવ્યો જગત્કર્તા જગત્સાક્ષી જગત્પ્રિયઃ ॥ ૫૫॥

જમ્ભારિવન્દ્યો જયદો જગઞ્જનમનોહરઃ ।
જગદાનન્દજનકો જનજાડ્યાપહારકઃ ॥ ૫૬॥

જપાકુસુમસઙ્કાશો જનલોચનશોભનઃ ।
જનેશ્વરો જગદ્ભવ્યો જનજન્મનિબર્હણઃ ॥ ૫૭॥

જયદો જન્તુતાપઘ્નો જિતદૈત્યમહાપથઃ ।
જિતમાયો જિતક્રોધો જિતસઙ્ગો જનપ્રિયઃ ॥ ૫૮॥

ઝઞ્ઝાનિલમહાવેગો ઝટિતાશેષપાતકઃ ।
ઝર્ઝરીકૃતદૈત્યૌઘો ઝલ્લરીવાદ્યસુપ્રિયઃ ॥ ૫૯॥

જ્ઞાનમૂર્તિર્જ્ઞાનગમ્યો જ્ઞાની જ્ઞાનમહાનિધિઃ ।
જ્ઞાનોપદેશકર્તા ચ જ્ઞાનદો જ્ઞાનદેશિકઃ ॥ ૬૦॥

ટઙ્કારનૃત્તવિભવષ્ટઙ્કવજધ્વજાઙ્કિતઃ ।
ટઙ્કિતાખિલલોકશ્ચ ટઙ્કિતૈનસ્તમોરવિઃ ॥ ૬૧॥

ઠકારમધ્યનિલયષ્ઠવર્ણાકારમણ્ડલઃ ।
ઠપદાન્તશ્શ્રૂયમાણાનાદરૂપષ્ઠકારકઃ ॥ ૬૨॥

ડમ્બરપ્રભવો ડમ્ભો ડમડુમરુકપ્રિયઃ ।
ડામરોત્કટસન્નાદો ડિમ્ભરૂપસ્વરૂપકઃ ॥ ૬૩॥

ઢક્કાનાદપ્રીતિકરો ઢાલિતાસુરસઙ્કુલઃ ।
ઢૌકિતામરસન્દોહો ઢુણ્ઢિવિઘ્નેશ્વરાનુજઃ ॥ ૬૪॥

ણકારબિન્દુદ્વન્દ્વૈક્યજ્ઞાનેનાશ્ચર્યકારકઃ ।
ણબિન્દુત્રયવન્મધ્યબિન્દ્વાશ્લિષ્ટાદ્વિવલ્લિકઃ ॥ ૬૫॥

તત્ત્વજ્ઞઃ તત્ત્વગઃ તીવ્રઃ તપોરૂપઃ તપોમયઃ ।
ત્રયીમયઃ ત્રિકાલજ્ઞઃ સ્ત્રિમૂર્તિઃ ત્રિગુણાત્મકઃ ॥ ૬૬॥

ત્રિદશેશઃ તારકારિઃ તાપઘ્નઃ તાપસપ્રિયઃ ।
તુષ્ટિદઃ તુષ્ટિકૃત્તીક્ષ્ણઃ તપોરૂપઃ ત્રિકાલવિત્ ॥ ૬૭॥

સ્તોતા સ્તવ્યઃ સ્તવપ્રીતઃ સ્તુતિઃ સ્તોત્રં સ્તવપ્રિયઃ ।
તારેશપૂજિતઃ તથ્યઃ તુમ્બુરૂનારદાર્ચિતઃ ॥ ૬૮॥

સ્થિરઃ સ્થાયી સ્થાપકશ્ચ સ્થૂલસૂક્ષ્મપ્રદર્શકઃ ।
સ્થવિષ્ઠઃ સ્થવિરઃ સ્થૂલઃ સ્થાનદઃ સ્થૈર્યદઃ સ્થિરઃ ॥ ૬૯॥

દાન્તો દયાપરો દાતા દુરિતઘ્નો દુરાસદઃ ।
દર્શનીયો દયાસારો દેવદેવો દયાનિધિઃ ॥ ૭૦॥

દુરાધર્ષો દુર્વિગાહ્યો દક્ષો દર્પણશોભિતઃ ।
દુર્ધરો દાનશૂરશ્ચ દ્વાદશાક્ષો દ્વિષડ્ભુજઃ ॥ ૭૧॥

દ્વિષટ્કર્ણો દ્વિષણ્ણેત્રો દીનસન્તાપનાશનઃ ।
દન્દશૂકેશ્વરો દેવો દિવ્યો દિવ્યાકૃતિર્દમઃ ॥ ૭૨॥

દીર્ઘપૃષ્ઠો દીર્ઘબાહુર્દીર્ઘદૃષ્ટિર્દિવસ્પતિઃ ।
દણ્ડો દમયિતા દર્પો દેવસિંહો દૃઢવ્રતઃ ॥ ૭૩॥

દુર્લભો દુર્ગમો દીપ્તો દુષ્પ્રેક્ષ્યો દિવ્યમઙ્ગલઃ ।
દુરોદરઘ્નો દુઃખઘ્નો દુરારિઘ્નો દિશામ્પતિઃ ॥ ૭૪॥

દુર્જયો દેવસેનેશો દુર્જ્ઞેયો દુરતિક્રમઃ ।
દમ્ભો દૃપ્તશ્ચ દેવર્ષિર્દૈવજ્ઞો દૈવચિન્તકઃ ॥ ૭૫॥

ધુરન્ધરો ધર્મપરો ધનદો ધૃતિવર્ધનઃ ।
ધર્મેશો ધર્મશાસ્ત્રજ્ઞો ધન્વી ધર્મપરાયણઃ ॥ ૭૬॥

ધનાધ્યક્ષો ધનપતિર્ધૃતિમાન્ધૂતકિલ્બિષઃ ।
ધર્મહેતુર્ધર્મગુરુર્ધર્મકૃદ્ધર્મવિદ્ ધ્રુવઃ ॥ ૭૭॥

ધાતા ધીમાન્ધર્મચારી ધન્યો ધુર્યો ધૃતવ્રતઃ ।
ધરીત્રીમણ્ડલાધ્યક્ષો ધનધાન્યવિવર્ધનઃ ॥ ૭૮॥

નિત્યોત્સવો નિત્યતૃપ્તો નિર્લેપો નિશ્ચલાત્મકઃ ।

નિરવદ્યો નિરાધારો નિષ્કલઙ્કો નિરઞ્જનઃ ॥ ૭૯॥

નિર્મમો નિરહઙ્કારો નિર્મોહો નિરુપદ્રવઃ ।
નિત્યાનન્દો નિરાતઙ્કો નિષ્પ્રપઞ્ચો નિરામયઃ ॥ ૮૦॥

નિરવદ્યો નિરીહશ્ચ નિર્દ્વન્દ્વો નિર્મલાત્મકઃ ।
નીરજાક્ષો નિર્જરેશો નિસ્સઙ્ગો નિગમસ્તુતઃ ॥ ૮૧॥

નિષ્કણ્ટકો નિરાલમ્બો નિષ્પ્રત્યૂહો નિરુદ્ભવઃ ।
નિત્યો નિયતકલ્યાણો નિર્વિકલ્પો નિરાશ્રયઃ ॥ ૮૨॥

નેતા નિધિર્નૈકરૂપો નિરાકારો નદીસુતઃ ।
નાનાયુધધરો નાથો નાનાસામ્રાજ્યદાયકઃ ॥ ૮૩॥

નાગપાશધરો નન્દી નારદાદિસુપૂજિતઃ ।
નાટ્યોત્સુકો નદીસૂનુર્નગારિપ્રિયદાયકઃ ॥ ૮૪॥

નક્ષત્રરૂપી નક્ષત્રં નેતા નિત્યોત્સુકો નટઃ ।
નિર્મલો નિરહઙ્કારો નિત્યાભીષ્ટફલપ્રદઃ ॥ ૮૫॥

પુલિન્દકન્યારમણઃ પુરુજિત્પરમપ્રિયઃ ।
પ્રત્યક્ષમૂર્તિઃ પ્રત્યક્ષઃ પરેશઃ પૂર્ણપુણ્યદઃ ॥ ૮૬॥

પુણ્યાકરઃ પુણ્યરૂપઃ પુણ્યઃ પુણ્યપરાયણઃ ।
પુણ્યોદયઃ પરઞ્જ્યોતિઃ પુણ્યકૃત્પુણ્યવર્ધનઃ ॥ ૮૭॥

પરાનન્દઃ પરતરઃ પુણ્યકીર્તિઃ પુરાતનઃ ।
પ્રસન્નરૂપઃ પ્રાણેશઃ પન્નગઃ પાપનાશનઃ ॥ ૮૮॥

પ્રણતાર્તિહરઃ પૂર્ણઃ પાર્વતીનન્દનઃ પ્રભુઃ ।
પૂતાત્મા પુરુષઃ પ્રાણઃ પ્રભવઃ પુરુષોત્તમઃ ॥ ૮૯॥

પ્રસન્નઃ પરમશ્રેષ્ઠઃ પટઃ પરિવૃઢઃ પરઃ ।
પરમાત્મા પરબ્રહ્મ પરર્દ્ધિઃ પ્રિયદર્શનઃ ॥ ૯૦॥

પવિત્રઃ પુષ્ટિદઃ પૂર્તિઃ પિઙ્ગલઃ પુષ્ટિવર્ધનઃ ।
પાપઘ્નઃ પાશહસ્તશ્ચ પ્રમત્તાસુરશિક્ષકઃ ॥ ૯૧॥

પાવનઃ પાવકઃ પૂજ્યઃ પૂર્ણાનન્દઃ પરાત્પરઃ ।
પુષ્કરઃ પ્રવરઃ પૂર્વઃ પિતૃભક્તપુરોગમઃ ॥ ૯૨॥

પ્રાણદઃ પ્રાણિજનકઃ પ્રતિષ્ઠા પાવકોદ્ભવઃ ।
પરબ્રહ્મસ્વરૂપશ્ચ પરમૈશ્વર્યકારણમ્ ॥ ૯૩ ॥

પરર્દ્ધિદઃ પુષ્ટિકરઃ પ્રકાશાત્મા પ્રતાપવાન્ ।
પ્રજ્ઞાકરઃ પ્રકૃષ્ટાર્થઃ પૃથુઃ પૃથુપરાક્રમઃ ॥ ૯૪ ॥

પૂતનાજીવહરણજામાતા પુર્ણવિગ્રહઃ ।
ફણીશ્વરઃ ફણિવરઃ ફણામણિવિભૂષિતઃ ॥ ૯૫ ॥

ફલદઃ ફલહસ્તશ્ચ ફુલ્લામ્બુજવિલોચનઃ ।
ફડુચ્ચાટિતપાપૌઘઃ ફણિલોકવિભૂષણઃ ॥ ૯૬ ॥

ફણિસઙ્ઘાદરાપીતનિજવાણીરસામૃતઃ ।
બાહુલેયો બૃહદ્રૂપો બલિષ્ઠો બલવાન્ બલઃ ॥ ૯૭ ॥

બ્રહ્મેશવિષ્ણુરૂપશ્ચ બુદ્ધિર્બુદ્ધિમતાં વરઃ ।
બાલરૂપો બૃહદ્ગર્ભો બ્રહ્મચારી બુધપ્રિયઃ ॥ ૯૮ ॥

બહુશ્રુતો બહુમતો બ્રહ્મણ્યો બ્રાહ્મણપ્રિયઃ ।
બલપ્રમથનો બ્રહ્મા બહુરૂપો બહુપ્રદઃ ॥ ૯૯ ॥

બૃહદ્ભાનુતનૂદ્ભૂતો બૃહદ્બાહુર્બિલેશયઃ ।
બહુબાહુર્બલશ્રીમાન્બહુદૈત્યવિનાશકઃ ॥ ૧૦૦ ॥

બિલદ્વારાન્તરાલસ્થો બૃહચ્છક્તિધનુર્ધરઃ ।
બાલાર્કદ્યુતિમાન્ બાલો બૃહદ્વક્ષા બૃહદ્ધનુઃ ॥ ૧૦૧ ॥

બદ્ધતૂણીરાંસદેશો બદ્ધપાશવિમોચનઃ ।
ભવ્યો ભોગીશ્વરો ભાવ્યો ભવનાશો ભવપ્રિયઃ ॥ ૧૦૨ ॥

ભક્તિગમ્યો ભયહરો ભાવજ્ઞો ભજનપ્રિયઃ ।
ભુક્તિમુક્તિપ્રદો ભોગી ભગવાન્ભાગ્યવર્ધનઃ ॥ ૧૦૩ ॥

ભ્રાજિષ્ણુર્ભાવનો ભર્તા ભીમો ભીમપરાક્રમઃ ।
ભૂતિદો ભૂતિકૃદ્ભોક્તા ભૂતાત્મા ભુવનેશ્વરઃ ॥ ૧૦૪ ॥

ભાવુકો ભીકરો ભીષ્મો ભાવુકેષ્ટો ભવોદ્ભવઃ ।
ભવતાપપ્રશમનો ભોગવાન્ ભૂતભાવનઃ ॥ ૧૦૫ ॥

ભોજ્યપ્રદો ભ્રાન્તિનાશો ભાનુમાન્ ભુવનાશ્રયઃ ।
ભૂરિભોગપ્રદો ભદ્રો ભજનીયો ભિષગ્વરઃ ॥ ૧૦૬ ॥

ભક્તેષ્ટદાનનિરતો ભાર્ગબાદ્યભિવન્દિતઃ ।
મહાસેનો મહોદારો મહાશક્તિર્મહાદ્યુતિઃ ॥ ૧૦૭॥

મહાબુદ્ધિર્મહાવીર્યો મહોત્સાહો મહાબલઃ ।
મહાભાગો મહામાયી મેધાવી મેખલી મહાન્ ॥ ૧૦૮॥

મુનિસ્તુતો મહામાન્યો મહાનન્દો મહાયશાઃ ।
મહોર્જિતો માનનિધિર્મનોરથફલપ્રદઃ ॥ ૧૦૯॥

મહોદયો મહાપુણ્યો મહાબલપરાક્રમઃ ।
માનદો મતિદો માની મુક્તામાલાવિભૂષણઃ ॥ ૧૧૦॥

મનોહરો મહામુખ્યો મહર્દ્ધિર્મૂર્તિમાન્મુનિઃ ।
મહોત્તમો મહોપાયો મોક્ષદો મઙ્ગલપ્રદઃ ॥ ૧૧૧॥

મુદાકરો મુક્તિદાતા મહાભોગો મહોરગઃ ।
યશસ્કરો યોગયોનિર્યોગિષ્ઠો યમિનાં વરઃ ॥ ૧૧૨॥

યશસ્વી યોગપુરુષો યોગ્યો યોગનિધિર્યમી ।
યમિસેવ્યો યોગયુક્તો યોગવિદ્યોગસિદ્ધિદઃ ॥ ૧૧૩॥

યન્તા યન્ત્રી ચ યન્ત્રજ્ઞો યન્ત્રવાન્યન્ત્રનાયકઃ ।
યાતનારહિતો યોગી યોગીશો યોગિનાં વરઃ ॥ ૧૧૪॥

યોગારાધ્યપદદ્વન્દો યમાદ્યષ્ટાઙ્ગસાધકઃ ।
રમણીયો રમ્યરૂપો રસજ્ઞો રસભાવુકઃ ॥ ૧૧૫॥

રઞ્જનો રઞ્જિતો રાગી રુજારી રુદ્રસમ્ભવઃ ।
રણપ્રિયો રણોદારો રાગદ્વેષવિનાશનઃ ॥ ૧૧૬॥

રત્નાર્ચી રુચિરો રમ્યો રૂપલાવણ્યવિગ્રહઃ ।
રત્નાઙ્ગદધરો રત્નભૂષણો રમણીયકઃ ॥ ૧૧૭॥

રુચિકૃદ્રોચમાનશ્ચ રઞ્જિતો રોગનાશનઃ ।
રાજીવાક્ષો રાજરાજો રક્તમાલ્યાનુલેપનઃ ॥ ૧૧૮॥

રાજદ્વેદાગમસ્તુત્યો રજસ્સત્ત્વગુણાન્વિતઃ ।
રજનીશકલારમ્યો રત્નકુણ્ડલમણ્ડિતઃ ॥ ૧૧૯॥

રત્નસન્મૌલિશોભાઢ્યો રણન્મઞ્જીરભૂષણઃ ।

રસવક્ત્રધરો રાગી રઞ્જનીયપદામ્બુજઃ ॥ ૧૨૦॥

લોકૈકનાથો લોકેશ લાલિતો લોકનાયકઃ ।
લોકશિક્ષો લોકરક્ષો લોકલોચનરઞ્જિતઃ ॥ ૧૨૧॥

લોકચૂડામણિર્લોલોલાવણ્યો લયવર્જિતઃ ।
લોકાધ્યક્ષો લોકવન્દ્યો લોકોત્તરગુણાકરઃ ॥ ૧૨૨॥

લોકબન્ધુર્લોકદાતા લોકત્રયમહાહિતઃ ।
લોકાતીતગુણોપેતો લોકાલોકસ્વરૂપવાન્ ॥ ૧૨૩॥

લાસ્યપ્રિયો લાસ્યદર્શી લતાકુસુમપૂજિતઃ ।
લબ્ધમાનો લબ્ધરસો લબ્ધહર્ષો લસત્કરઃ ॥ ૧૨૪॥

વરિષ્ઠો વરદો વન્દ્યો વિશિષ્ટો વિક્રમી વિભુઃ ।
વિબુધાગ્રચરો વિશ્વં વિકલ્પપરિવર્જિતઃ ॥ ૧૨૫॥

વિપાશો વિગતાતઙ્કો વિચિત્રાઙ્ગો વિરોચનઃ ।
વિદ્યાધરો વિશુદ્ધાત્મા વેદાઙ્ગો વિબુધપ્રિયઃ ॥ ૧૨૬॥

વર્ચસ્કરો વ્યાપકશ્ચ વિજ્ઞાની વિનયાન્વિતઃ ।
વિદ્વત્તમો વિરોધિઘ્નો વીરો વીરાસનોવિધિઃ ॥ ૧૨૭॥

વીતરાગો વિનીતાત્મા વેદગર્ભો વિરાડ્વપુઃ ।
વિશ્વદીપ્તિર્વિશાલાક્ષો વિજિતાત્મા વિભાવનઃ ॥ ૧૨૮॥

વેદવેદ્યો વિધેયાત્મા વીતદોષશ્ચ વસુપ્રદઃ ।
વિશ્વકર્મા વીતભયો વાગીશો વાસવાર્ચિતઃ ॥ ૧૨૯॥

વેદદ્વિશ્વરૂપશ્ચ વિશ્વમુર્તિર્વરાસનઃ ।
વાગ્મી વેદધરો વિદ્વાન્વિશાખો વિમલો વટુઃ ॥ ૧૩૦॥

વીરચૂડામણિર્વીરવિજયો વિબુધાશ્રયઃ ।
વિજયી વિનયી વેત્તા વરીયાન્વિરજા વસુઃ ॥ ૧૩૧॥

વીરઘ્નો વિજ્વરો વેદ્યો વેગવાન્વીર્યવાન્વશી ।
વરશીલો વરગુણો વિશોકો વજ્રધારકઃ ॥ ૧૩૨॥

શરજન્મા શક્તિધરઃ શત્રુઘ્નઃ શિખિવાહનઃ ।
શ્રીમાન્શિષ્ટઃ શુચિઃ શુદ્ધઃ શાશ્વતઃ શ્રુતિસાગરઃ ॥ ૧૩૩॥

શરણ્યઃ શુભદઃ શર્મ શિષ્ટેષ્ટઃ શુભલક્ષણઃ ।
શાન્તઃ શૂલધરઃ શ્રેષ્ઠઃ શુદ્ધાત્મા શઙ્કરઃ શિવઃ ॥ ૧૩૪॥

શિતિકણ્ઠાત્મજઃ શૂરઃ શાન્તિદઃ શોકનાશનઃ ।
શૂરસંહારદક્ષશ્ચ શિષ્ટાચારપ્રપૂજિતઃ ॥ ૧૩૫॥

ષાણ્માતુરઃ ષણ્મુખશ્ચ ષડ્ગુણૈશ્વર્યસંયુતઃ ।
ષટ્ચક્રસ્થઃ ષડૂર્મિઘ્નઃ ષડઙ્ગશ્રુતિપારગઃ ॥ ૧૩૬॥

ષડ્ભાવરહિતઃ ષટ્કઃ ષટ્શાસ્ત્રસ્મૃતિપારગઃ ।
ષડ્વર્ગરૂપઃ ષડ્ગ્રીવઃ ષડરિઘ્નઃ ષડાશ્રયઃ ॥ ૧૩૭॥

ષટ્કિરીટધરઃ શ્રીમાન્ ષડાધારશ્ચ ષટ્ક્રમઃ ।
ષટ્કોણમધ્યનિલયઃ ષણ્ડત્વપરિહારકઃ ॥ ૧૩૮॥

સેનાનીઃ સુભગઃ સ્કન્દઃ સુરાનન્દઃ સતાં ગતિઃ ।
સુબ્રહ્મણ્યઃ સુરાધ્યક્ષઃ સર્વજ્ઞઃ સર્વદઃ સુખી ॥ ૧૩૯॥

સુલભઃ સિદ્ધિદઃ સૌમ્યઃ સિદ્ધેશઃ સિદ્ધિસાધનઃ ।
સિદ્ધાર્થઃ સિદ્ધસઙ્કલ્પઃ સિદ્ધસાધુઃ સુરેશ્વરઃ ॥ ૧૪૦॥

સુભુજઃ સર્વવિત્સાક્ષી સુપ્રસાદઃ સનાતનઃ ।
સુધાપતિઃ સ્વયઞ્જ્યોતિઃ સ્વયમ્ભૂઃ સર્વતોમુખઃ ॥ ૧૪૧॥

સમર્થઃ સત્કૃતઃ સૂક્ષ્મઃ સુમુખઃ સુખદઃ સુહૃત્ ।
સુપ્રસન્નઃ સુરશ્રેષ્ઠઃ સુશીલઃ સત્યસાધકઃ ॥ ૧૪૨॥

સમ્ભાવ્યઃ સુમનસ્સેવ્યઃ સકલાગમપારગઃ ।
સુવ્યક્તઃ સચ્ચિદાનન્દઃ સુવીરઃ સુજનાશ્રયઃ ॥ ૧૪૩॥

સર્વલક્ષણસમ્પન્નઃ સત્યધર્મપરાયણઃ ।
સર્વદેવમયઃ સત્યઃ સદામૃષ્ટાન્નદાયકઃ ॥ ૧૪૪॥

સુધન્વાઃ સુમતિઃ સત્યઃ સર્વવિઘ્નવિનાશનઃ ।
સર્વદુઃખપ્રશમનઃ સુકુમારઃ સુલોચનઃ ॥ ૧૪૫॥

સુગ્રીવઃ સુચિરાઃ સારઃ સુરાધ્યક્ષઃ સુરારિહાઃ ।
સુવિક્રમઃ સર્વવર્ણઃ સર્પરાજઃ સદાશુચિઃ ॥ ૧૪૬॥

સપ્તાર્ચિર્ભૂઃ સુરવરઃ સર્વાયુધવિશારદઃ ।
સર્વલોકૈકનાથશ્ચ સામ્બારાધનતત્પરઃ ॥ ૧૪૭॥

હસ્તિચર્મામ્બરસુતો હસ્તિવાહનસેવિતઃ ।
હસ્ત્યશ્વવાહનો હસ્તી હર્ષદૈત્યહરાનુજઃ ॥ ૧૪૮॥

હકારરૂપો હંસાત્મા હલભૃત્ હરિપૂજિતઃ ।
હવિર્હરિદ્રાવર્ણશ્ચ હૃતાઘો હસિતાનનઃ ॥ ૧૪૯॥

હેમભૂષો હરિદ્વર્ણો હૃષ્ટિદો હૃષ્ટિવર્ધનઃ ।
હેલાદ્રિવિધ્વંસકારી હુઙ્કારહૃતકિલ્બિષઃ ॥ ૧૫૦॥

હિમાદ્રિજાતનૂદ્ભૂતો હરિકેશો હિરણ્મયઃ ।
હૃદ્યો હૃષ્ટો હરિસખો હંસો હંસગતિર્હવિઃ ॥ ૧૫૧॥

હિરણ્યવર્ણો હિતકૃદ્ધર્ષદો હેમભૂષણઃ ।
હરપ્રિયો હિતકરો હતપાપો હૃદોદ્ભવઃ ॥ ૧૫૨॥

ક્ષેમદઃ ક્ષેમકૃત્ક્ષેમ્યઃ ક્ષેત્રજ્ઞઃ ક્ષેત્રવર્જિતઃ ।
ક્ષેત્રપાલઃ ક્ષમાધારઃ ક્ષેમ્યઃ ક્ષેત્રં ક્ષમાકરઃ ॥ ૧૫૩॥

ક્ષુત્તૃડ્ઘ્નઃ ક્ષાન્તિદઃ ક્ષેમી ક્ષિતિભૂષઃ ક્ષમાશ્રયઃ ।
ક્ષાલિતાઘઃ ક્ષિતિધરઃ ક્ષીણસમ્રક્ષણક્ષમઃ ॥ ૧૫૪॥

અઙ્ગન્યાસઃ -

ૐ શં ઓઙ્કારસ્વરૂપાય ઓજોધરાય ઓજસ્વિને સુહૃદ્યાય
હૃષ્ટચિત્તાત્મને ભાસ્વદ્રૂપાય હૃદયાય નમઃ ।
ૐ રં ષટ્કોણમધ્યનિલયાય ષટ્કિરીટધરાય શ્રીમતે ષડાધારાય
ષડાનનાય લલાટષણ્ણેત્રાય અભયવરદહસ્તાય શિરસે સ્વાહા ।
ૐ વં ષણ્મુખાય શરજન્મને શુભલક્ષણાય શિખિવાહનાય
ષડક્ષરાય સ્વામિનાથાય શિખાયૈ વષટ્ ।
ૐ ણં કૃશાનુસમ્ભવાય કવચિને કુક્કુટધ્વજાય શૂરમર્દનાય
કુમારાય સુબ્રહ્મણ્યાય કવચાય હુમ્ ।
ૐ ભં કન્દર્પકોટિદિવ્યવિગ્રહાય દ્વિષડ્બાહવે દ્વાદશાક્ષરાય
નિત્યજ્ઞાનસ્વરૂપાય દ્વાદશાક્ષાય મૂલપ્રકૃતિરહિતાય
નેત્રત્રયાય વૌષટ્ ।
ૐ વં સચ્ચિદાનન્દસ્વરૂપાય સર્વરૂપાત્મને ખેટધરાય ખડ્ગિને
શક્તિહસ્તાય બ્રહ્મૈકરૂપિણે અસ્ત્રાય ફટ્ ॥

ૐ ભૂર્ભુવસ્સુવરોં ઇતિ દિગ્વિમોકઃ ॥

ધ્યાનં -

ધ્યાયેત્ષણ્મુખમિન્દુકોટિસદૃશં રત્નપ્રભાશોભિતમ્ ।
બાલાર્કદ્યુતિષટ્કિરીટવિલસત્કેયૂરહારાન્વિતમ્ ॥

કર્ણાલમ્બિતકુણ્ડલપ્રવિલસદ્ગણ્ડસ્થલાશોભિતમ્ ।
કાઞ્ચીકઙ્કણકિઙ્કિણીરવયુતં શઋઙ્ગારસારોદયમ્ ॥

ષડ્વક્ત્રં શિખિવહનં ત્રિનયનં ચિત્રામ્બરાલઙ્કૃતમ્ ।
વજ્રં શક્તિમસિં ત્રિશૂલમભયં ખેટં ધનુશ્ચક્રકમ્ ॥

પાશં કુક્કુટમઙ્કુશં ચ વરદં દોર્ભિર્દધાનં સદા ।
ધ્યાયેદીપ્સિતસિદ્ધિદં શિવસુતં સ્કન્દં સુરારાધિતમ્ ॥

દ્વિષડ્ભુજં ષણ્મુખમમ્બિકાસુતં કુમારમાદિત્ય સહસ્રતેજસમ્ ।
વન્દે મયૂરાસનમગ્નિસમ્ભવં સેનાન્યમદ્યાહમભીષ્ટસિદ્ધયે ॥

પઞ્ચપૂજા -

લં પૃથિવ્યાત્મને ગન્ધં કલ્પયામિ ।
હં આકાશાત્મને પુષ્પાણિ કલ્પયામિ ।
યં વાય્વાત્મને ધૂપં કલ્પયામિ ।
રં અગ્ન્યાત્મને દીપં કલ્પયામિ ।
વં અમૃતાત્મને અમૃતં મહાનૈવેદ્યં કલ્પયામિ ।
સં સર્વાત્મને તામ્બૂલાદિ સર્વોપચારપૂજાન્ કલ્પયામિ ।

ફલસ્તુતિ -

નામ્નાં સહસ્રં સ્કન્દસ્ય વેદભૂતધરામિતૈઃ ।
શ્લોકૈરનુષ્ટુપ્છન્દોભિર્બદ્ધં સામ્રાજ્યદાયકમ્ ॥ ૧૫૫॥

અકારાદિક્ષકારાન્તનામ્નામેતદ્રહસ્ય તુ ।
યોઽસૌ તાત્પર્યતઃ પાઠી સર્વજ્ઞઃ સુખિતો ભવેત્ ॥ ૧૫૬॥

ઇતિ નામસહસ્રં હિ ષણ્મુખસ્ય ચ નારદ ।
યઃ પઠેચ્છૃણુયાદ્વાપિ ભક્તિયુક્તેન ચેતસા ।
સ સદ્યો મુચ્યતે પાપૈર્મનોવાક્કાયસમ્ભવૈઃ ॥ ૧૫૭॥

સર્વરોગપ્રશમનં સર્વસમ્પત્કરં શુભમ્ ।

સર્વદારિદ્ર્યશમનં સર્વમઙ્ગલવર્ધનમ્ ॥ ૧૫૮॥

સર્વવશ્યકરં નૃણાં સર્વરક્ષાકરં પરમ્ ।
સર્વસિદ્ધિપ્રદં સદ્યસ્સર્વબન્ધવિમોચનમ્ ॥ ૧૫૯॥

આયુર્વૃદ્ધિકરં પુંસાં સ્થૈર્યવીર્યવિવર્ધનમ્ ।
સ્તવરાજમિદં પુણ્યં ચતુર્વર્ગફલપ્રદમ્ ॥ ૧૬૦॥

વાક્યેનૈકેન વક્ષ્યામિ વાઞ્છિતાર્થન્પ્રયચ્છતિ ।
ઇદં રહસ્યં પરમં સ્તોત્રમેદન્મયોદિતમ્ ।
તસ્માત્સર્વાર્થસિદ્ધ્યર્થં નિયમેન જપેત્સુધીઃ ॥ ૧૬૧॥

॥ ઇતિ શ્રીસ્કાન્દે મહાપુરાણે શઙ્કરસમ્હિતાયાં
શિવરહસ્યખણ્ડે ઈશ્વરપ્રોક્તે બ્રહ્મનારદસંવાદે
શ્રીસુબ્રહ્મણ્યમાતૃકામલિકાસહસ્રનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

॥ શ્રી સુબ્રહ્મણ્ય માતૃકામાલિકા સહસ્રનામાવલિઃ ॥

ૐ અચિન્ત્યશક્તયે નમઃ ।
ૐ અનઘાય નમઃ ।
ૐ અક્ષોભ્યાય નમઃ ।
ૐ અપરાજિતાય નમઃ ।
ૐ અનાથવત્સલાય નમઃ ।
ૐ અમોઘાય નમઃ ।
ૐ અશોકાય નમઃ ।
ૐ અજરાય નમઃ ।
ૐ અભયાય નમઃ ।
ૐ અત્યુદારાય નમઃ । (૧૦)
ૐ અઘહરાય નમઃ ।
ૐ અગ્રગણ્યાય નમઃ ।
ૐ અદ્રિજાસુતાય નમઃ ।
ૐ અનન્તમહિમ્ને નમઃ ।
ૐ અપારાય નમઃ ।
ૐ અનન્તસૌખ્યાય નમઃ ।
ૐ અન્નદાય નમઃ ।
ૐ અવ્યયાય નમઃ ।

ॐ અનુત્તમાય નમઃ ।
ॐ અક્ષયાય નમઃ । (૨૦)
ॐ અનાદયે નમઃ ।
ॐ અપ્રમેયાય નમઃ ।
ॐ અક્ષરાય નમઃ ।
ॐ અચ્યુતાય નમઃ ।
ॐ અકલ્મષાય નમઃ ।
ॐ અભિરામાય નમઃ ।
ॐ અગ્રધુર્યાય નમઃ ।
ॐ અમિતવિક્રમાય નમઃ ।
ॐ અતુલાય નમઃ ।
ॐ અમૃતાય નમઃ । (૩૦)
ॐ અઘોરાય નમઃ ।
ॐ અનન્તાય નમઃ ।
ॐ અનન્તવિક્રમાય નમઃ ।
ॐ અનાથનાથાય નમઃ ।
ॐ અમલાય નમઃ ।
ॐ અપ્રમત્તાય નમઃ ।
ॐ અમરપ્રભવે નમઃ ।
ॐ અરિન્દમાય નમઃ ।
ॐ અખિલાધારાય નમઃ ।
ॐ અણિમાદિગુણાગ્રણ્યે નમઃ । (૪૦)
ॐ અચઞ્ચલાય નમઃ ।
ॐ અમરસ્તુત્યાય નમઃ ।
ॐ અકલઙ્કાય નમઃ ।
ॐ અમિતાશનાય નમઃ ।
ॐ અગ્નિભુવે નમઃ ।
ॐ અનવદ્યાઙ્ગાય નમઃ ।
ॐ અદ્ભુતાય નમઃ ।
ॐ અભીષ્ટદાયકાય નમઃ ।
ॐ અતીન્દ્રિયાય નમઃ ।
ॐ અપ્રમેયાત્મને નમઃ । (૫૦)

ૐ અદૃશ્યાય નમઃ ।

ૐ અવ્યક્તલક્ષણાય નમઃ ।

ૐ આપદ્વિનાશકાય નમઃ ।

ૐ આર્યાય નમઃ ।

ૐ આઢ્યાય નમઃ ।

ૐ આગમસંસ્તુતાય નમઃ ।

ૐ આર્તસંરક્ષણાય નમઃ ।

ૐ આદ્યાય નમઃ ।

ૐ આનન્દિને નમઃ ।

ૐ આર્યસેવિતાય નમઃ । (૬૦)

ૐ આશ્રિતેષ્ટાર્થવરદાય નમઃ ।

ૐ આનન્દાર્થફલપ્રદાય નમઃ ।

ૐ આશ્ચર્યરૂપાય નમઃ ।

ૐ આનન્દાય નમઃ ।

ૐ આપન્નાર્તિવિનાશનાય નમઃ ।

ૐ આરાધિતપદદ્વન્દ્વાય નમઃ ।

ૐ આગમાર્થવિશારદાય નમઃ ।

ૐ આનન્દસુન્દરાકારાય નમઃ ।

ૐ આબ્રહ્મસ્તમ્બરૂપકાય નમઃ ।

ૐ આધારષટ્કનિલયાય નમઃ । (૭૦)

ૐ આદિમધ્યાન્તવર્જિતાય નમઃ ।

ૐ આબ્રહ્મકીટજનકાય નમઃ ।

ૐ આખણ્ડલસુતાધિપાય નમઃ ।

ૐ ઇભવક્ત્રાનુજાય નમઃ ।

ૐ ઇષ્ટાય નમઃ ।

ૐ ઇભાસુરહરાત્મજાય નમઃ ।

ૐ ઇતિહાસસુસંસ્તુત્યાય નમઃ ।

ૐ ઇન્દ્રભોગફલપ્રદાય નમઃ ।

ૐ ઇષ્ટાપૂર્તફલપ્રાપ્તયે નમઃ ।

ૐ ઇષ્ટેષ્ટવરદાયકાય નમઃ । (૮૦)

ૐ ઇહામુત્રેષ્ટફલદાય નમઃ ।

ૐ ઇષ્ટદાય નમઃ ।

ૐ ઇન્દ્રવન્દિતાય નમઃ ।

ૐ ઈડનીયાય નમઃ ।

ૐ ઈશપુત્રાય નમઃ ।

ૐ ઈપ્સિતાર્થપ્રદાયકાય નમઃ ।

ૐ ઈતિભીતિહરાય નમઃ ।

ૐ ઈડ્યાય નમઃ ।

ૐ ઈષણાત્રયવર્જિતાય નમઃ ।

ૐ ઈશ્વરાર્પિતવેદાર્થાય નમઃ । (૯૦)

ૐ ઈશ્વરપ્રિયનન્દનાય નમઃ ।

ૐ ઈશ્વરાઙ્કુવિહારિણે નમઃ ।

ૐ ઈશિત્રે નમઃ ।

ૐ ઈશ્વરરૂપધૃતે નમઃ ।

ૐ ઉદારકીર્તયે નમઃ ।

ૐ ઉદ્યોગિને નમઃ ।

ૐ ઉત્કૃષ્ટાય નમઃ ।

ૐ ઉરુપરાક્રમાય નમઃ ।

ૐ ઉત્કૃષ્ટશક્તયે નમઃ ।

ૐ ઉત્સાહાય નમઃ । (૧૦૦)

ૐ ઉદારાય નમઃ ।

ૐ ઉત્સવપ્રિયાય નમઃ ।

ૐ ઉજ્જૃમ્ભાય નમઃ ।

ૐ ઉદ્ભવાય નમઃ ।

ૐ ઉગ્રાય નમઃ ।

ૐ ઉદગ્રાય નમઃ ।

ૐ ઉદગ્રલોચનાય નમઃ ।

ૐ ઉન્મત્તાય નમઃ ।

ૐ ઉગ્રશમનાય નમઃ ।

ૐ ઉદ્વેગઘ્નાય નમઃ । (૧૧૦)

ૐ ઉરગેશ્વરાય નમઃ ।

ૐ ઉરુપ્રભાવાય નમઃ ।

ૐ ઉદીર્ણાય નમઃ ।

ૐ ઉમાસૂનવે નમઃ ।

ૐ ઉદારધિયે નમઃ ।

ૐ ઉદગ્રવૈભવાય નમઃ ।

ૐ ઉદગ્રબુદ્ધિદાય નમઃ ।

ૐ ઉદગ્રહેતિમતે નમઃ ।

ૐ ઊર્ધ્વરેતઃસુતાય નમઃ ।

ૐ ઊર્ધ્વગતિદાય નમઃ । (૧૨૦)

ૐ ઊર્જપાલકાય નમઃ ।

ૐ ઊર્જિતાય નમઃ ।

ૐ ઊર્ધ્વગાય નમઃ ।

ૐ ઊર્ધ્વાય નમઃ ।

ૐ ઊર્ધ્વલોકૈકનાયકાય નમઃ ।

ૐ ઊર્જાવતે નમઃ ।

ૐ ઊર્જિતોદારાય નમઃ ।

ૐ ઊર્જિતાય નમઃ ।

ૐ ઊર્જિતશાસનાય નમઃ ।

ૐ ઊરીકૃતધનુર્બાણવે નમઃ । (૧૩૦)

ૐ ઊર્મિષટ્કવિનાશનાય નમઃ ।

ૐ ઋષિદેવગણસ્તુત્યાય નમઃ ।

ૐ ઋણત્રયવિમોચનાય નમઃ ।

ૐ ઋજુરૂપાય નમઃ ।

ૐ ઋજુકરાય નમઃ ।

ૐ ઋજુમાર્ગપ્રદર્શનાય નમઃ ।

ૐ ઋતમ્ભરાય નમઃ ।

ૐ ઋજુપ્રીતાય નમઃ ।

ૐ ઋષભાય નમઃ ।

ૐ ઋદ્ધિદાય નમઃ । (૧૪૦)

ૐ ઋચે નમઃ ।

ૐ ઋગ્વેદાદિસ્વરૂપાય નમઃ ।

ૐ ઋદ્ધાત્મને નમઃ ।

ૐ ઋષિપૂજિતાય નમઃ ।

ૐ ઋલેખાવત્રિનાડ્યન્તસ્સુષુમ્નાનાડી-મધ્યગાય નમઃ ।

ૐ ઋકૃત્સ્વપ્નાધજાગ્રાન્તમધ્યાય નમઃ ।

ૐ ઋતમ્ભરાત્મકાય નમઃ ।

ૐ ऌલિતોદ્ધારકાય નમઃ ।

ૐ ऌબ્ધજનદૂરાય નમઃ ।

ૐ ऌનામકાય નમઃ । (૧૫૦)

ૐ ऌપ્તાચારમનોદૂરાય નમઃ ।

ૐ ऌપ્તદુઃખાય નમઃ ।

ૐ ऌળત્પ્રભાય નમઃ ।

ૐ ॡનમાયાસુરાય નમઃ ।

ૐ ॡનસંસારાખ્યમહાવનાય નમઃ ।

ૐ એણાઙ્કધરસત્પુત્રાય નમઃ ।

ૐ એકસ્મૈ નમઃ ।

ૐ એનૌઘનાશનાય નમઃ ।

ૐ એકાગ્રધ્યાનશીલાય નમઃ ।

ૐ એકાન્તધ્યાનપૂજિતાય નમઃ । (૧૬૦)

ૐ ઐશ્વર્યદાય નમઃ ।

ૐ ઐન્દ્રભોગિને નમઃ ।

ૐ ઐતિહ્યાય નમઃ ।

ૐ ઐન્દ્રવન્દિતાય નમઃ ।

ૐ ઐશાનપદસન્દાયિને નમઃ ।

ૐ એન્દ્રદિક્પાલજાધિપાય નમઃ ।

ૐ ઓજસ્વિને નમઃ ।

ૐ ઓષધિસ્થાનાય નમઃ ।

ૐ ઓજોદાય નમઃ ।

ૐ ઓદનપ્રદાય નમઃ । (૧૭૦)

ૐ ઓઙ્કારરૂપિણે નમઃ ।

ૐ ઓઙ્કારાય નમઃ ।

ૐ ઓઙ્કારાર્થવિશારદાય નમઃ ।

ૐ ઔદાર્યશીલાય નમઃ ।

ૐ ઔમેયાય નમઃ ।

ૐ ઔગ્રાય નમઃ ।

ૐ ઔન્નત્યદાયકાય નમઃ ।

ૐ ઔદાર્યાય નમઃ ।

ૐ ઔષધકરાય નમઃ ।
ૐ ઔષધાય નમઃ । (૧૮૦)
ૐ ઔષધાકરાય નમઃ ।
ૐ અંશુમતે નમઃ ।
ૐ અંશુમાલીડ્યાય નમઃ ।
ૐ અમ્બિકાતનયાય નમઃ ।
ૐ અન્નદાય નમઃ ।
ૐ અન્ધકારિસુતાય નમઃ ।
ૐ અન્ધત્વહારિણે નમઃ ।
ૐ અમ્બુજલોચનાય નમઃ ।
ૐ અસ્તમાયાય નમઃ ।
ૐ અર્પણાર્હાય નમઃ । (૧૯૦)
ૐ અસ્પષ્ટાય નમઃ ।
ૐ અસ્તોકપુણ્યદાય નમઃ ।
ૐ અસ્તામિત્રાય નમઃ ।
ૐ અસ્તરૂપાય નમઃ ।
ૐ અસ્ખલદ્ગતિદાયકાય નમઃ ।
ૐ કાર્તિકેયાય નમઃ ।
ૐ કામરૂપાય નમઃ ।
ૐ કુમારાય નમઃ ।
ૐ ક્રૌઞ્ચદારણાય નમઃ ।
ૐ કામદાય નમઃ । (૨૦૦)
ૐ કારણાય નમઃ ।
ૐ કામ્યાય નમઃ ।
ૐ કમનીયાય નમઃ ।
ૐ કૃપાકરાય નમઃ ।
ૐ કાઞ્ચનાભાય નમઃ ।
ૐ કાન્તિયુક્તાય નમઃ ।
ૐ કામાય નમઃ ।
ૐ કામપ્રદાય નમઃ ।
ૐ કવયે નમઃ ।
ૐ કીર્તિકૃતે નમઃ । (૨૧૦)

ૐ કુક્કુટધરાય નમઃ ।
ૐ કૂટસ્થાય નમઃ ।
ૐ કુવલેક્ષણાય નમઃ ।
ૐ કુઙ્કુમાઙ્ગાય નમઃ ।
ૐ ક્લમહરાય નમઃ ।
ૐ કુશલાય નમઃ ।
ૐ કુક્કુટધ્વજાય નમઃ ।
ૐ કુશાનુસમ્ભવાય નમઃ ।
ૐ ક્રૂરાય નમઃ ।
ૐ ક્રૂરઘ્નાય નમઃ । (૨૨૦)
ૐ કલિતાપહૃતે નમઃ ।
ૐ કામરૂપાય નમઃ ।
ૐ કલ્પતરવે નમઃ ।
ૐ કાન્તાય નમઃ ।
ૐ કામિતદાયકાય નમઃ ।
ૐ કલ્યાણકૃતે નમઃ ।
ૐ ક્લેશનાશાય નમઃ ।
ૐ કૃપાલવે નમઃ ।
ૐ કરુણાકરાય નમઃ ।
ૐ કળૂષઘ્નાય નમઃ । (૨૩૦)
ૐ ક્રિયાશક્તાય નમઃ ।
ૐ કઠોરાય નમઃ ।
ૐ કવચિને નમઃ ।
ૐ કૃતિને નમઃ ।
ૐ કોમલાઙ્ગાય નમઃ ।
ૐ કુહૂપ્રીતાય નમઃ ।
ૐ કુત્સિતઘ્નાય નમઃ ।
ૐ કલાધરાય નમઃ ।
ૐ ખ્યાતાય નમઃ ।
ૐ ખેટધરાય નમઃ । (૨૪૦)
ૐ ખડ્ગિને નમઃ ।
ૐ ખટ્વાઙ્ગિને નમઃ ।

ૐ ખલનિગ્રહાય નમઃ ।
ૐ ખ્યાતિપ્રદાય નમઃ ।
ૐ ખેચરેશાય નમઃ ।
ૐ ખ્યાતેનસે નમઃ ।
ૐ ખેચરસ્તુતાય નમઃ ।
ૐ ખરતાપહરાય નમઃ ।
ૐ ખસ્થાય નમઃ ।
ૐ ખેચરાય નમઃ । (૨૫૦)
ૐ ખેચરાશ્રયાય નમઃ ।
ૐ ખણ્ડેન્દુમૌલિતનયાય નમઃ ।
ૐ ખેલાખેચરપાલકાય નમઃ ।
ૐ ખસ્થપ્રિયાય નમઃ ।
ૐ ખણ્ડિતાદ્યાય નમઃ ।
ૐ ખેચરીજનપૂજિતાય નમઃ ।
ૐ ખેટાદ્યાયુધસમ્પન્નાય નમઃ ।
ૐ ખર્વેતરપદપ્રદાય નમઃ ।
ૐ ગાઙ્ગેયાય નમઃ ।
ૐ ગિરિજાપુત્રાય નમઃ । (૨૬૦)
ૐ ગણનાથાનુજાય નમઃ ।
ૐ ગુહાય નમઃ ।
ૐ ગોપ્ત્રે નમઃ ।
ૐ ગીર્વાણસંસેવ્યાય નમઃ ।
ૐ ગુણાતીતાય નમઃ ।
ૐ ગુણાશ્રયાય નમઃ ।
ૐ ગતિપ્રદાય નમઃ ।
ૐ ગુણનિધયે નમઃ ।
ૐ ગમ્ભીરાય નમઃ ।
ૐ ગિરિજાત્મજાય નમઃ । (૨૭૦)
ૐ ગૂઢરૂપાય નમઃ ।
ૐ ગદહરાય નમઃ ।
ૐ ગ્રહાધીશાય નમઃ ।
ૐ ગણાગ્રણ્યે નમઃ ।

ૐ ગોધરાય નમઃ ।
ૐ ગહનાય નમઃ ।
ૐ ગુપ્તાય નમઃ ।
ૐ ગર્વઘ્નાય નમઃ ।
ૐ ગુણવર્દ્ધનાય નમઃ ।
ૐ ગુહ્યાય નમઃ । (૨૮૦)
ૐ ગુણજ્ઞાય નમઃ ।
ૐ ગીતિજ્ઞાય નમઃ ।
ૐ ગતાતઙ્કાય નમઃ ।
ૐ ગુણોત્તરાય નમઃ ।
ૐ ગદ્યપદ્યપ્રિયાય નમઃ ।
ૐ ગુણ્યાય નમઃ ।
ૐ ગોસ્તુતાય નમઃ ।
ૐ ગગનેચરાય નમઃ ।
ૐ ગણનીયચરિત્રાય નમઃ ।
ૐ ગતક્લેશાય નમઃ । (૨૯૦)
ૐ ગુહાશ્રયાય નમઃ ।
ૐ ઘૂર્ણિતાક્ષાય નમઃ ।
ૐ ઘૃણિનિધયે નમઃ ।
ૐ ઘનગમ્ભીરઘોષણાય નમઃ ।
ૐ ઘણ્ટાનાદપ્રિયાય નમઃ ।
ૐ ઘોષાય નમઃ ।
ૐ ઘોરાઘૌઘવિનાશનાય નમઃ ।
ૐ ઘનપ્રિયાય નમઃ ।
ૐ ઘનાનન્દાય નમઃ ।
ૐ ઘર્મહન્ત્રે નમઃ ।
ૐ ઘૃણાવતે નમઃ । (૩૦૦)
ૐ ઘૃષ્ટિપાતકાય નમઃ ।
ૐ ઘૃણયે નમઃ ।
ૐ ઘૃણાકરાય નમઃ ।
ૐ ઘોરાય નમઃ ।
ૐ ઘોરદૈત્યપ્રહારકાય નમઃ ।

ૐ ઘટિદૈત્યપ્રહારકાય નમઃ ।
ૐ ઘટીતૈશ્વર્યસન્દોહાય નમઃ ।
ૐ ઘનર્દ્ધયે નમઃ ।
ૐ ઘનવિક્રમાય નમઃ ।
ૐ ઘૃણિમણ્ડલરૂપાય નમઃ ।
ૐ ઘનસમ્પત્પ્રદાય નમઃ । (૩૧૦)
ૐ ઘનાય નમઃ ।
ૐ ઙકારસ્વરણસ્સર્વરન્ધ્રસ્થ-ત્રિપુટીપ્રભાય નમઃ ।
ૐ ઙણદ્ઘણ્ટારવાન્તસ્થાય નમઃ ।
ૐ ઙણારાવતતિપ્રિયાય નમઃ ।
ૐ ઙકારાકારકદ્વન્દ્વ-સર્વસન્ધ્યાપ્ત-ચિન્મયાય નમઃ ।
ૐ ચિત્રકૃતે નમઃ ।
ૐ ચિત્રવર્ણાય નમઃ ।
ૐ ચઞ્ચલાય નમઃ ।
ૐ ચપલદ્યુતયે નમઃ ।
ૐ ચિન્મયાય નમઃ । (૩૨૦)
ૐ ચિત્સ્વરૂપાય નમઃ ।
ૐ ચિદાનન્દાય નમઃ ।
ૐ ચિરન્તનાય નમઃ ।
ૐ ચિત્રકેલયે નમઃ ।
ૐ ચિત્રતરાય નમઃ ।
ૐ ચિન્તનીયાય નમઃ ।
ૐ ચમત્કૃતયે નમઃ ।
ૐ ચોરઘ્નાય નમઃ ।
ૐ ચતુરાય નમઃ ।
ૐ ચારવે નમઃ । (૩૩૦)
ૐ ચામીકરવિભૂષણાય નમઃ ।
ૐ ચન્દ્રાર્કકોટિસદૃશાય નમઃ ।
ૐ ચન્દ્રમૌલિતનૂદ્ભવાય નમઃ ।
ૐ ચેટીભૂતપ્રપઞ્ચાય નમઃ ।
ૐ ચણ્ડાય નમઃ ।
ૐ ચણ્ડોરિવિક્રમાય નમઃ ।

ૐ છાદિતાઙ્ગાય નમઃ ।

ૐ છદ્મહન્ત્રે નમઃ ।

ૐ છેદિતાખિલપાતકાય નમઃ ।

ૐ છેદીકૃતતમહાક્લેશાય નમઃ । (૩૪૦)

ૐ છત્રીકૃતમહાયશસે નમઃ ।

ૐ છાદિતાશેષસન્તાપાય નમઃ ।

ૐ છુરિતાનીકસાગરાય નમઃ ।

ૐ છેદિતાશેષદૈત્યૌઘાય નમઃ ।

ૐ છાતૈનસે નમઃ ।

ૐ છિન્નસંશયાય નમઃ ।

ૐ છન્દોમયાય નમઃ ।

ૐ છન્દગામિને નમઃ ।

ૐ છિન્નપાશાય નમઃ ।

ૐ છવિચ્છદાય નમઃ । (૩૫૦)

ૐ છેદિતાશેષસંસારાય નમઃ ।

ૐ છવ્યગ્રીન્દુવિલોચનાય નમઃ ।

ૐ જગદ્ધિતાય નમઃ ।

ૐ જગત્પૂજ્યાય નમઃ ।

ૐ જગજ્જ્યેષ્ઠાય નમઃ ।

ૐ જગન્મયાય નમઃ ।

ૐ જનકાય નમઃ ।

ૐ જાહ્નવીસૂનવે નમઃ

ૐ જિતામિત્રાય નમઃ ।

ૐ જગદ્ગુરવે નમઃ । (૩૬૦)

ૐ જયિને નમઃ ।

ૐ જિતેન્દ્રિયાય નમઃ ।

ૐ જૈત્રે નમઃ ।

ૐ જરામરણવર્જિતાય નમઃ ।

ૐ જ્યોતિર્મયાય નમઃ ।

ૐ જગન્નાથાય નમઃ ।

ૐ જગજ્જીવાય નમઃ ।

ૐ જનાશ્રયાય નમઃ ।

ૐ જગદ્વન્દ્યાય નમઃ ।

ૐ જગચ્છ્રેષ્ઠાય નમઃ । (૩૭૦)

ૐ જિતક્લેશાય નમઃ ।

ૐ જગદ્વિભવે નમઃ ।

ૐ જગત્સેવ્યાય નમઃ ।

ૐ જગત્કર્ત્રે નમઃ ।

ૐ જગત્સાક્ષિણે નમઃ ।

ૐ જગત્પ્રિયાય નમઃ ।

ૐ જમ્ભારિવન્દ્યાય નમઃ ।

ૐ જયદાય નમઃ ।

ૐ જગજ્જનમનોહરાય નમઃ ।

ૐ જગદાનન્દજનકાય નમઃ । (૩૮૦)

ૐ જનજાડ્યાપહારકાય નમઃ ।

ૐ જપાકુસુમસઙ્કાશાય નમઃ ।

ૐ જનલોચનશોભનાય નમઃ ।

ૐ જનેશ્વરાય નમઃ ।

ૐ જગદ્ભવ્યાય નમઃ ।

ૐ જનજન્મનિબર્હણાય નમઃ ।

ૐ જયદાય નમઃ ।

ૐ જન્તુતાપઘ્નાય નમઃ ।

ૐ જિતદૈત્યમહાપથાય નમઃ ।

ૐ જિતમાયાય નમઃ । (૩૯૦)

ૐ જિતક્રોધાય નમઃ ।

ૐ જિતસઙ્ગાય નમઃ ।

ૐ જનપ્રિયાય નમઃ ।

ૐ ઝઞ્ઝાનિલમહાવેગાય નમઃ ।

ૐ ઝરિતાશેષપાતકાય નમઃ ।

ૐ ઝર્ઝરીકૃતદૈત્યૌઘાય નમઃ ।

ૐ ઝલ્લરીવાદ્યસુપ્રિયાય નમઃ ।

ૐ જ્ઞાનમૂર્તયે નમઃ ।

ૐ જ્ઞાનગમ્યાય નમઃ ।

ૐ જ્ઞાનિને નમઃ । (૪૦૦)

ૐ જ્ઞાનમહાનિધયે નમઃ ।

ૐ જ્ઞાનોપદેશિકર્ત્રે નમઃ ।

ૐ જ્ઞાનદાય નમઃ ।

ૐ જ્ઞાનદેશિકાય નમઃ ।

ૐ ટઙ્કારનૃત્તવિભવાય નમઃ ।

ૐ ટઙ્કવજધ્વજાઙ્કિતાય નમઃ ।

ૐ ટઙ્કિતાખિલલોકાય નમઃ ।

ૐ ટઙ્કિતૈનસ્તમોરવયે નમઃ ।

ૐ ઠકારમધ્યનિલયાય નમઃ ।

ૐ ઠવર્ણાકારમણ્ડલાય નમઃ । (૪૧૦)

ૐ ઠપદાન્તશ્શ્રૂયમાણનાદરૂપાય નમઃ ।

ૐ ઠકારાય નમઃ ।

ૐ ડમ્બરપ્રભવાય નમઃ ।

ૐ ડમ્ભાય નમઃ ।

ૐ ડમડ્ડમરુકપ્રિયાય નમઃ ।

ૐ ડમરોત્કટસન્નાદાય નમઃ ।

ૐ ડિમ્ભરૂપસ્વરૂપકાય નમઃ ।

ૐ ઢક્કાનાદપ્રીતિકરાય નમઃ ।

ૐ ઢાલિતાસુરસઙ્કુલાય નમઃ ।

ૐ ઢૌકિતામરસન્દોહાય નમઃ । (૪૨૦)

ૐ ઢુણ્ઢિવિઘ્નેશ્વરાનુજાય નમઃ ।

ૐ ણકારબિન્દુદ્વન્દ્વૈક્ય-જ્ઞાનેનાશ્ચર્યકારકાય નમઃ ।

ૐ ણબિન્દુત્રયવન્મધ્યબિન્દ્વાશ્લિષ્ટદ્વિ-વલ્લિકાય નમઃ ।

ૐ તત્ત્વજ્ઞાય નમઃ ।

ૐ તત્ત્વગાય નમઃ ।

ૐ તીવ્રાય નમઃ ।

ૐ તપોરૂપાય નમઃ ।

ૐ તપોમયાય નમઃ ।

ૐ ત્રયીમયાય નમઃ ।

ૐ ત્રિકાલજ્ઞાય નમઃ । (૪૩૦)

ૐ ત્રિમૂર્તયે નમઃ ।

ૐ ત્રિગુણાત્મકાય નમઃ ।

ૐ ત્રિદશેશાય નમઃ ।

ૐ તારકારયે નમઃ ।

ૐ તાપઘ્નાય નમઃ ।

ૐ તાપસપ્રિયાય નમઃ ।

ૐ તુષ્ટિદાય નમઃ ।

ૐ તુષ્ટિકૃતે નમઃ ।

ૐ તીક્ષ્ણાય નમઃ ।

ૐ તપોરૂપાય નમઃ । (૪૪૦)

ૐ ત્રિકાલવિદે નમઃ ।

ૐ સ્તોત્રે નમઃ ।

ૐ સ્તવ્યાય નમઃ ।

ૐ સ્તવપ્રીતાય નમઃ ।

ૐ સ્તુતયે નમઃ ।

ૐ સ્તોત્રાય નમઃ ।

ૐ સ્તવપ્રિયાય નમઃ ।

ૐ તારેશપૂજિતાય નમઃ ।

ૐ તથ્યાય નમઃ ।

ૐ તુમ્બુરુનારદાર્ચિતાય નમઃ ।

ૐ સ્થિરાય નમઃ । (૪૫૧)

ૐ સ્થાયિને નમઃ ।

ૐ સ્થાપકાય નમઃ ।

ૐ સ્થૂલસૂક્ષ્મપ્રદર્શકાય નમઃ ।

ૐ સ્થવિષ્ઠાય નમઃ ।

ૐ સ્થવિરાય નમઃ ।

ૐ સ્થૂલાય નમઃ ।

ૐ સ્થાનદાય નમઃ ।

ૐ સ્થૈર્યદાય નમઃ ।

ૐ સ્થિરાય નમઃ । (૪૬૦)

ૐ દાન્તાય નમઃ ।

ૐ દયાપરાય નમઃ ।

ૐ દાત્રે નમઃ ।

ૐ દુરિતઘ્નાય નમઃ ।

ૐ દુરાસદાય નમઃ ।

ૐ દર્શનીયાય નમઃ ।

ૐ દયાસારાય નમઃ ।

ૐ દેવદેવાય નમઃ ।

ૐ દયાનિધયે નમઃ ।

ૐ દુરાધર્ષાય નમઃ । (૪૭૦)

ૐ દુર્વિગાહ્યાય નમઃ ।

ૐ દક્ષાય નમઃ ।

ૐ દર્પણશોભિતાય નમઃ ।

ૐ દુર્ધરાય નમઃ ।

ૐ દાનશૂરાય નમઃ ।

ૐ દ્વાદશાક્ષાય નમઃ ।

ૐ દ્વિષડ્ભુજાય નમઃ ।

ૐ દ્વિષટ્કર્ણાય નમઃ ।

ૐ દ્વિષણ્ણેત્રાય નમઃ ।

ૐ દીનસન્તાપનાશનાય નમઃ ।

ૐ દન્દશૂકેશ્વરાય નમઃ । (૪૮૧)

ૐ દેવાય નમઃ ।

ૐ દિવ્યાય નમઃ ।

ૐ દિવ્યાકૃતયે નમઃ ।

ૐ દમાય નમઃ ।

ૐ દીર્ઘપૃષ્ઠાય નમઃ ।

ૐ દીર્ઘબાહવે નમઃ ।

ૐ દીર્ઘદૃષ્ટયે નમઃ ।

ૐ દિવસ્પતયે નમઃ ।

ૐ દણ્ડાય નમઃ । (૪૯૦)

ૐ દમયિત્રે નમઃ ।

ૐ દર્પાય નમઃ ।

ૐ દેવસિંહાય નમઃ ।

ૐ દૃઢવ્રતાય નમઃ ।

ૐ દુર્લભાય નમઃ ।

ૐ દુર્ગમાય નમઃ ।

ૐ દીપ્તાય નમઃ ।

ૐ દુષ્પ્રેક્ષ્યાય નમઃ ।

ૐ દિવ્યમઙ્ગલાય નમઃ ।

ૐ દુરોદરઘ્નાય નમઃ । (૫૦૦)

ૐ દુઃખઘ્નાય નમઃ ।

ૐ દુરારિઘ્નાય નમઃ ।

ૐ દિશામ્પતયે નમઃ ।

ૐ દુર્જયાય નમઃ ।

ૐ દેવસેનેશાય નમઃ ।

ૐ દુર્જ્ઞેયાય નમઃ ।

ૐ દુરતિક્રમાય નમઃ ।

ૐ દમ્ભાય નમઃ ।

ૐ દૃપ્તાય નમઃ ।

ૐ દેવર્ષયે નમઃ । (૫૧૦)

ૐ દૈવજ્ઞાય નમઃ ।

ૐ દૈવચિન્તકાય નમઃ ।

ૐ ધુરન્ધરાય નમઃ ।

ૐ ધર્મપરાય નમઃ ।

ૐ ધનદાય નમઃ ।

ૐ ધૃતવર્ધનાય નમઃ ।

ૐ ધર્મેશાય નમઃ ।

ૐ ધર્મશાસ્ત્રજ્ઞાય નમઃ ।

ૐ ધન્વિને નમઃ ।

ૐ ધર્મપરાયણાય નમઃ । (૫૨૦)

ૐ ધનાધ્યક્ષાય નમઃ ।

ૐ ધનપતયે નમઃ ।

ૐ ધૃતિમતે નમઃ ।

ૐ ધૂતકિલ્બિષાય નમઃ ।

ૐ ધર્મહેતવે નમઃ ।

ૐ ધર્મશૂરાય નમઃ ।

ૐ ધર્મકૃતે નમઃ ।

ૐ ધર્મવિદે નમઃ ।

ૐ ધ્રુવાય નમઃ ।
ૐ ધાત્રે નમઃ । (૫૩૦)
ૐ ધીમતે નમઃ ।
ૐ ધર્મચારિણે નમઃ ।
ૐ ધન્યાય નમઃ ।
ૐ ધુર્યાય નમઃ ।
ૐ ધૃતવ્રતાય નમઃ ।
ૐ ધરિત્રીમણ્ડલાધ્યક્ષાય નમઃ ।
ૐ ધન્ધાન્યવિવર્ધનાય નમઃ ।
ૐ નિત્યોત્સવાય નમઃ ।
ૐ નિત્યતૃપ્તાય નમઃ ।
ૐ નિર્લેપાય નમઃ । (૫૪૦)
ૐ નિશ્ચલાત્મકાય નમઃ ।
ૐ નિરવદ્યાય નમઃ ।
ૐ નિરાધારાય નમઃ ।
ૐ નિષ્કલઙ્કાય નમઃ ।
ૐ નિરઞ્જનાય નમઃ ।
ૐ નિર્માયાય નમઃ ।
ૐ નિરહઙ્કારાય નમઃ ।
ૐ નિર્મોહાય નમઃ ।
ૐ નિરુપદ્રવાય નમઃ ।
ૐ નિત્યાનન્દાય નમઃ । (૫૫૦)
ૐ નિરાતઙ્કાય નમઃ ।
ૐ નિષ્પ્રપઞ્ચાય નમઃ ।
ૐ નિરામયાય નમઃ ।
ૐ નિરવદ્યાય નમઃ ।
ૐ નિરીહાય નમઃ ।
ૐ નિર્દ્વન્દ્વાય નમઃ ।
ૐ નિર્મલાત્મકાય નમઃ ।
ૐ નીરજાક્ષાય નમઃ ।
ૐ નિર્જરેશાય નમઃ ।
ૐ નિઃસઙ્ગાય નમઃ । (૫૬૦)

ૐ નિગમસ્તુતાય નમઃ ।

ૐ નિષ્કણ્ટકાય નમઃ ।

ૐ નિરાલમ્બાય નમઃ ।

ૐ નિષ્પ્રત્યૂહાય નમઃ ।

ૐ નિરુદ્ભવાય નમઃ ।

ૐ નિત્યાય નમઃ ।

ૐ નિયતકલ્યાણાય નમઃ ।

ૐ નિર્વિકલ્પાય નમઃ ।

ૐ નિરાશ્રયાય નમઃ ।

ૐ નેત્રે નમઃ । (૫૭૦)

ૐ નિધયે નમઃ ।

ૐ નૈકરૂપાય નમઃ ।

ૐ નિરાકારાય નમઃ ।

ૐ નદીસુતાય નમઃ ।

ૐ નાનાયુધધરાય નમઃ ।

ૐ નાથાય નમઃ ।

ૐ નાનાસામ્રાજ્યદાયકાય નમઃ ।

ૐ નાગપાશધરાય નમઃ ।

ૐ નન્દિને નમઃ ।

ૐ નારદાદિસુપૂજિતાય નમઃ । (૫૮૦)

ૐ નાટ્યોત્સુકાય નમઃ ।

ૐ નદીસૂનવે નમઃ ।

ૐ નગારિપ્રિયદાયકાય નમઃ ।

ૐ નક્ષત્રરૂપિણે નમઃ ।

ૐ નેત્રે નમઃ ।

ૐ નિત્યોત્સુકાય નમઃ ।

ૐ નટાય નમઃ ।

ૐ નિર્મલાય નમઃ ।

ૐ નિરહઙ્કારાય નમઃ । (૫૯૦)

ૐ નિત્યાભીષ્ટફલપ્રદાય નમઃ ।

ૐ પુલિન્દકન્યારમણાય નમઃ ।

ૐ પુરુજિત્પરમપ્રિયાય નમઃ ।

ॐ પ્રત્યક્ષમૂર્તયે નમઃ ।

ॐ પ્રત્યક્ષાય નમઃ ।

ॐ પરેશાય નમઃ ।

ॐ પૂર્ણપુણ્યદાય નમઃ ।

ॐ પુણ્યાકરાય નમઃ ।

ॐ પુણ્યરૂપાય નમઃ ।

ॐ પુણ્યાય નમઃ । (૬૦૦)

ॐ પુણ્યપરાયણાય નમઃ ।

ॐ પુણ્યોદયાય નમઃ ।

ॐ પરસ્મૈ જ્યોતિષે નમઃ ।

ॐ પુણ્યકૃતે નમઃ ।

ॐ પુણ્યવર્ધનાય નમઃ ।

ॐ પરાનન્દાય નમઃ ।

ॐ પરતરાય નમઃ ।

ॐ પુણ્યકીર્તયે નમઃ ।

ॐ પુરાતનાય નમઃ ।

ॐ પ્રસન્નરૂપાય નમઃ । (૬૧૦)

ॐ પ્રાણેશાય નમઃ ।

ॐ પન્નગાય નમઃ ।

ॐ પાપનાશનાય નમઃ ।

ॐ પ્રણતાર્તિહરાય નમઃ ।

ॐ પૂર્ણાય નમઃ ।

ॐ પાર્વતીનન્દનાય નમઃ ।

ॐ પ્રભવે નમઃ ।

ॐ પૂતાત્મને નમઃ ।

ॐ પુરુષાય નમઃ ।

ॐ પ્રાણાય નમઃ । (૬૨૦)

ॐ પ્રભવાય નમઃ ।

ॐ પુરુષોત્તમાય નમઃ ।

ॐ પ્રસન્નાય નમઃ ।

ॐ પરમશ્રેષ્ઠાય નમઃ ।

ॐ પટવે નમઃ ।

ૐ પરિબૃઢાય નમઃ ।
ૐ પરસ્મૈ નમઃ ।
ૐ પરમાત્મને નમઃ ।
ૐ પરબ્રહ્મણે નમઃ ।
ૐ પરર્દ્ધયે નમઃ । (૬૩૦)
ૐ પ્રિયદર્શનાય નમઃ ।
ૐ પવિત્રાય નમઃ ।
ૐ પુષ્ટિદાય નમઃ ।
ૐ પૂર્તયે નમઃ ।
ૐ પિઙ્ગલાય નમઃ ।
ૐ પુષ્ટિવર્ધનાય નમઃ ।
ૐ પાપઘ્નાય નમઃ ।
ૐ પાશહસ્તાય નમઃ ।
ૐ પ્રમત્તાસુરશિક્ષકાય નમઃ ।
ૐ પાવનાય નમઃ । (૬૪૦)
ૐ પાવકાય નમઃ ।
ૐ પૂજ્યાય નમઃ ।
ૐ પૂર્ણાનન્દાય નમઃ ।
ૐ પરાત્પરાય નમઃ ।
ૐ પુષ્કરાય નમઃ ।
ૐ પ્રવરાય નમઃ ।
ૐ પૂર્વસ્મૈ નમઃ ।
ૐ પિતૃભક્તપુરોગમાય નમઃ ।
ૐ પ્રાણદાય નમઃ ।
ૐ પ્રાણિજનકાય નમઃ । (૬૫૦)
ૐ પ્રતિષ્ઠાયૈ નમઃ ।
ૐ પાવકોદ્ભવાય નમઃ ।
ૐ પરબ્રહ્મસ્વરૂપાય નમઃ ।
ૐ પરમૈશ્વર્યકારણાય નમઃ ।
ૐ પરર્દ્ધિદાય નમઃ ।
ૐ પુષ્ટિકરાય નમઃ ।
ૐ પ્રકાશાત્મને નમઃ ।

ૐ પ્રતાપવતે નમઃ ।

ૐ પ્રજ્ઞાપરાય નમઃ ।

ૐ પ્રકૃષ્ટાર્થાય નમઃ ।

ૐ પૃથવે નમઃ ।

ૐ પૃથુપરાક્રમાય નમઃ ।

ૐ પૂતનાજીવહરણજામાત્રે નમઃ ।

ૐ પૂર્ણવિગ્રહાય નમઃ ।

ૐ ફણીશ્વરાય નમઃ ।

ૐ ફણિવરાય નમઃ ।

ૐ ફણામણિવિભુષિતાય નમઃ ।

ૐ ફલદાય નમઃ ।

ૐ ફલહસ્તાય નમઃ ।

ૐ ફુલ્લામ્બુજવિલોચનાય નમઃ । (૬૭૦)

ૐ ફડુચ્ચાટિતપાપૌઘાય નમઃ ।

ૐ ફણિલોકવિભૂષણાય નમઃ ।

ૐ ફણિસઙ્ઘાદરાપીત-નિજવાણીરસામૃતાય નમઃ ।

ૐ બાહુલેયાય નમઃ ।

ૐ બૃહદ્રૂપાય નમઃ ।

ૐ બલિષ્ઠાય નમઃ ।

ૐ બલવતે નમઃ ।

ૐ બલિને નમઃ ।

ૐ બ્રહ્મેશવિષ્ણુરૂપાય નમઃ ।

ૐ બુદ્ધયે નમઃ । (૬૮૦)

ૐ બુદ્ધિમતાં વરાય નમઃ ।

ૐ બાલરૂપાય નમઃ ।

ૐ બૃહદ્ગર્ભાય નમઃ ।

ૐ બ્રહ્મચારિણે નમઃ ।

ૐ બુધપ્રિયાય નમઃ ।

ૐ બહુશ્રુતાય નમઃ ।

ૐ બહુમતાય નમઃ ।

ૐ બ્રહ્મણ્યાય નમઃ ।

ૐ બ્રાહ્મણપ્રિયાય નમઃ ।

ૐ બલપ્રમથનાય નમઃ । (૬૯૦)

ૐ બ્રહ્મણે નમઃ ।

ૐ બહુરૂપાય નમઃ ।

ૐ બહુપ્રદાય નમઃ ।

ૐ બૃહદ્ભાનુતનૂદ્ભૂતાય નમઃ ।

ૐ બૃહદ્બાહવે નમઃ ।

ૐ બિલેશયાય નમઃ ।

ૐ બહુબાહવે નમઃ ।

ૐ બલશ્રીમતે નમઃ ।

ૐ બહુદૈત્યવિનાશકાય નમઃ ।

ૐ બિલદ્વારાન્તરાલસ્થાય નમઃ ।

ૐ બૃહચ્છક્તિધનુર્ધરાય નમઃ ।

ૐ બાલાર્કદ્યુતિમતે નમઃ ।

ૐ બાલાય નમઃ ।

ૐ બૃહદ્વક્ષસે નમઃ ।

ૐ બૃહદ્ધનુષે નમઃ ।

ૐ બદ્ધતૂણીરાંસદેશાય નમઃ ।

ૐ બદ્ધપાશવિમોચનાય નમઃ ।

ૐ ભવ્યાય નમઃ ।

ૐ ભોગીશ્વરાય નમઃ ।

ૐ ભાવ્યાય નમઃ । (૭૧૦)

ૐ ભવનાશાય નમઃ ।

ૐ ભવપ્રિયાય નમઃ ।

ૐ ભક્તિગમ્યાય નમઃ ।

ૐ ભયહરાય નમઃ ।

ૐ ભાવજ્ઞાય નમઃ ।

ૐ ભજનપ્રિયાય નમઃ ।

ૐ ભુક્તિમુક્તિપ્રદાય નમઃ ।

ૐ ભોગિને નમઃ ।

ૐ ભગવતે નમઃ ।

ૐ ભાગ્યવર્ધનાય નમઃ । (૭૨૦)

ૐ ભ્રાજિષ્ણવે નમઃ ।

ૐ ભાવનાય નમઃ ।
ૐ ભર્ત્રે નમઃ ।
ૐ ભીમાય નમઃ ।
ૐ ભીમપરાક્રમાય નમઃ ।
ૐ ભૂતિદાય નમઃ ।
ૐ ભૂતિકૃતે નમઃ ।
ૐ ભોક્ત્રે નમઃ ।
ૐ ભૂતાત્મને નમઃ ।
ૐ ભુવનેશ્વરાય નમઃ । (૭૩૦)
ૐ ભાવુકાય નમઃ ।
ૐ ભીકરાય નમઃ ।
ૐ ભીષ્માય નમઃ ।
ૐ ભાવકેષ્ટાય નમઃ ।
ૐ ભવોદ્ભવાય નમઃ ।
ૐ ભવતાપપ્રશમનાય નમઃ ।
ૐ ભોગવતે નમઃ ।
ૐ ભૂતભાવનાય નમઃ ।
ૐ ભોજ્યપ્રદાય નમઃ ।
ૐ ભ્રાન્તિનાશાય નમઃ । (૭૪૦)
ૐ ભાનુમતે નમઃ ।
ૐ ભુવનાશ્રયાય નમઃ ।
ૐ ભૂરિભોગપ્રદાય નમઃ ।
ૐ ભદ્રાય નમઃ ।
ૐ ભજનીયાય નમઃ ।
ૐ ભિષગ્વરાય નમઃ ।
ૐ ભક્તેષ્ટદાનનિરતાય નમઃ ।
ૐ ભાર્ગવાદ્યભિવન્દિતાય નમઃ ।
ૐ મહાસેનાય નમઃ ।
ૐ મહોદરાય નમઃ । (૭૫૦)
ૐ મહાશક્તયે નમઃ ।
ૐ મહાદ્યુતયે નમઃ ।
ૐ મહાબુદ્ધયે નમઃ ।

ૐ મહાવીર્યાય નમઃ ।

ૐ મહોત્સાહાય નમઃ ।

ૐ મહાબલાય નમઃ ।

ૐ મહાભોગાય નમઃ ।

ૐ મહામાયિને નમઃ ।

ૐ મેધાવિને નમઃ ।

ૐ મેખલિને નમઃ । (૭૬૦)

ૐ મહતે નમઃ ।

ૐ મુનિસ્તુતાય નમઃ ।

ૐ મહામાન્યાય નમઃ ।

ૐ મહાનન્દાય નમઃ ।

ૐ મહાયશસે નમઃ ।

ૐ મહોર્જિતાય નમઃ ।

ૐ માનનિધયે નમઃ ।

ૐ મનોરથફલપ્રદાય નમઃ ।

ૐ મહોદયાય નમઃ ।

ૐ મહાપુણ્યાય નમઃ । (૭૭૦)

ૐ મહાબલપરાક્રમાય નમઃ ।

ૐ માનદાય નમઃ ।

ૐ મતિદાય નમઃ ।

ૐ માલિને નમઃ ।

ૐ મુક્તામાલાવિભૂષણાય નમઃ ।

ૐ મનોહરાય નમઃ ।

ૐ મહામુખ્યાય નમઃ ।

ૐ મહર્દ્ધયે નમઃ ।

ૐ મૂર્તિમતે નમઃ ।

ૐ મુનયે નમઃ । (૭૮૦)

ૐ મહોત્તમાય નમઃ ।

ૐ મહોપાયાય નમઃ ।

ૐ મોક્ષદાય નમઃ ।

ૐ મઙ્ગલપ્રદાય નમઃ ।

ૐ મુદાકરાય નમઃ ।

ૐ મુક્તિદાત્રે નમઃ ।

ૐ મહાભોગાય નમઃ ।

ૐ મહોરગાય નમઃ ।

ૐ યશસ્કરાય નમઃ ।

ૐ યોગયોનયે નમઃ । (૭૯૦)

ૐ યોગિષ્ઠાય નમઃ ।

ૐ યમિનાં વરાય નમઃ ।

ૐ યશસ્વિને નમઃ ।

ૐ યોગપુરુષાય નમઃ ।

ૐ યોગ્યાય નમઃ ।

ૐ યોગનિધયે નમઃ ।

ૐ યમિને નમઃ ।

ૐ યતિસેવ્યાય નમઃ ।

ૐ યોગયુક્તાય નમઃ ।

ૐ યોગવિદે નમઃ । (૮૦૦)

ૐ યોગસિદ્ધિદાય નમઃ ।

ૐ યન્ત્રાય નમઃ ।

ૐ યન્ત્રિણે નમઃ ।

ૐ યન્ત્રજ્ઞાય નમઃ ।

ૐ યન્ત્રવતે નમઃ ।

ૐ યન્ત્રનાયકાય નમઃ ।

ૐ યાતનારહિતાય નમઃ ।

ૐ યોગિને નમઃ ।

ૐ યોગીશાય નમઃ ।

ૐ યોગિનાં વરાય નમઃ । (૮૧૦)

ૐ રમણીયાય નમઃ ।

ૐ રમ્યરૂપાય નમઃ ।

ૐ રસજ્ઞાય નમઃ ।

ૐ રસભાવુકાય નમઃ ।

ૐ રઞ્જનાય નમઃ ।

ૐ રઞ્જિતાય નમઃ ।

ૐ રાગિણે નમઃ ।

ૐ રુજુરાયે નમઃ । (૮૨૦)

ૐ રુદ્રસમ્ભવાય નમઃ ।

ૐ રણપ્રિયાય નમઃ ।

ૐ રણોદારાય નમઃ ।

ૐ રાગદ્વેષવિનાશનાય નમઃ ।

ૐ રત્નાર્ચીરુચિરાય નમઃ ।

ૐ રમ્યાય નમઃ ।

ૐ રૂપલાવણ્યવિગ્રહાય નમઃ ।

ૐ રત્નાઙ્ગદધરાય નમઃ ।

ૐ રત્નભૂષણાય નમઃ ।

ૐ રમણીયકાય નમઃ । (૮૩૦)

ૐ રુચિકૃતે નમઃ ।

ૐ રોચમાનાય નમઃ ।

ૐ રઞ્જિતાય નમઃ ।

ૐ રોગનાશનાય નમઃ ।

ૐ રાજીવાક્ષાય નમઃ ।

ૐ રાજરાજાય નમઃ ।

ૐ રક્તમાલ્યાનુલેપનાય નમઃ ।

ૐ રાજદ્વેદાગમસ્તુત્યાય નમઃ ।

ૐ રજઃસત્ત્વગુણાન્વિતાય નમઃ ।

ૐ રજનીશકલારમ્યાય નમઃ ।(૮૪૦)

ૐ રત્નકુણ્ડલમણ્ડિતાય નમઃ ।

ૐ રત્નસન્મૌલિશોભાઢ્યાય નમઃ ।

ૐ રણન્મઞ્જીરભૂષણાય નમઃ ।

ૐ રસવક્ત્રધરાય નમઃ ।

ૐ રાગિણે નમઃ ।

ૐ રઞ્જનીયપદામ્બિજાય નમઃ ।

ૐ લોકૈકનાથાય નમઃ ।

ૐ લોકેશલલિતાય નમઃ ।

ૐ લોકનાયકાય નમઃ ।

ૐ લોકશિક્ષાય નમઃ । (૮૫૦)

ૐ લોકરક્ષાય નમઃ ।

ૐ લોકલોચનરઞ્જિતાય નમઃ ।

ૐ લોકચૂડામણયે નમઃ ।

ૐ લોલાય નમઃ ।

ૐ લાવણ્યાય નમઃ ।

ૐ લયવર્જિતાય નમઃ ।

ૐ લોકાધ્યક્ષાય નમઃ ।

ૐ લોકવન્દ્યાય નમઃ ।

ૐ લોકોત્તરગુણકરાય નમઃ ।

ૐ લોકબન્ધવે નમઃ । (૮૬૦)

ૐ લોકદાત્રે નમઃ ।

ૐ લોકત્રયમહાહિતાય નમઃ ।

ૐ લોકાતીતગુણોપેતાય નમઃ ।

ૐ લોકાલોકસ્વરૂપવતે નમઃ ।

ૐ લાસ્યપ્રિયાય નમઃ ।

ૐ લાસ્યદર્શિને નમઃ ।

ૐ લતાકુસુમપૂજિતાય નમઃ ।

ૐ લબ્ધમાનાય નમઃ ।

ૐ લબ્ધરસાય નમઃ ।

ૐ લબ્ધહર્ષાય નમઃ । (૮૭૦)

ૐ લસત્કરાય નમઃ ।

ૐ વરિષ્ઠાય નમઃ ।

ૐ વરદાય નમઃ ।

ૐ વન્દ્યાય નમઃ ।

ૐ વિશિષ્ટાય નમઃ ।

ૐ વિક્રમિણે નમઃ ।

ૐ વિભવે નમઃ ।

ૐ વિબુધાગ્રચરાય નમઃ ।

ૐ વિશ્વસ્મૈ નમઃ ।

ૐ વિકલ્પપરિવર્જિતાય નમઃ ।

ૐ વિપાશાય નમઃ । (૮૮૧)

ૐ વિગતાતઙ્કાય નમઃ ।

ૐ વિચિત્રાઙ્ગાય નમઃ ।

ૐ વિરોચનાય નમઃ ।

ૐ વિદ્યાધરાય નમઃ ।

ૐ વિશુદ્ધાત્મને નમઃ ।

ૐ વેદાઙ્ગાય નમઃ ।

ૐ વિબુધપ્રિયાય નમઃ ।

ૐ વચસ્કરાય નમઃ ।

ૐ વ્યાપકાય નમઃ । (૮૯૦)

ૐ વિજ્ઞાનિને નમઃ ।

ૐ વિનયાન્વિતાય નમઃ ।

ૐ વિદ્વત્તમાય નમઃ ।

ૐ વિરોધિઘ્નાય નમઃ ।

ૐ વીરાય નમઃ ।

ૐ વીરાસનાય નમઃ ।

ૐ વિધયે નમઃ ।

ૐ વીતરાગાય નમઃ ।

ૐ વિનીતાત્મને નમઃ ।

ૐ વેદગર્ભાય નમઃ । (૯૦૦)

ૐ વિરાડ્વપુષે નમઃ ।

ૐ વિશ્વદીપ્તયે નમઃ ।

ૐ વિશાલાક્ષાય નમઃ ।

ૐ વિજિતાત્મને નમઃ ।

ૐ વિભાવનાય નમઃ ।

ૐ વેદવેદ્યાય નમઃ ।

ૐ વિધેયાત્મને નમઃ ।

ૐ વીતદોષાય નમઃ ।

ૐ વસુપ્રદાય નમઃ ।

ૐ વિશ્વકર્મણે નમઃ । (૯૧૦)

ૐ વીતભયાય નમઃ ।

ૐ વાગીશાય નમઃ ।

ૐ વાસવાર્ચિતાય નમઃ ।

ૐ વેદવિદે નમઃ ।

ૐ વિશ્વરૂપાય નમઃ ।

ૐ વિશ્વમૂર્તયે નમઃ ।

ૐ વિશ્વરૂપાય નમઃ ।

ૐ વરાસનાય નમઃ ।

ૐ વાગ્મિને નમઃ ।

ૐ વેદધરાય નમઃ ।

ૐ વિદુષે નમઃ । (૯૨૦)

ૐ વિશાખાય નમઃ ।

ૐ વિમલાય નમઃ ।

ૐ વટવે નમઃ ।

ૐ વીરચૂડામણયે નમઃ ।

ૐ વીરવિજયાય નમઃ ।

ૐ વિબુધાશ્રયાય નમઃ ।

ૐ વિજયિને નમઃ ।

ૐ વિનયિને નમઃ ।

ૐ વેત્રે નમઃ ।

ૐ વરીયસે નમઃ । (૯૩૦)

ૐ વિરજસે નમઃ ।

ૐ વસવે નમઃ ।

ૐ વીરઘ્નાય નમઃ ।

ૐ વિજ્વરાય નમઃ ।

ૐ વેદ્યાય નમઃ ।

ૐ વેગવતે નમઃ ।

ૐ વીર્યવતે નમઃ ।

ૐ વશિને નમઃ ।

ૐ વરશીલાય નમઃ ।

ૐ વરગુણાય નમઃ । (૯૪૦)

ૐ વિશોકાય નમઃ ।

ૐ વજ્રધારકાય નમઃ ।

ૐ શરજન્મને નમઃ ।

ૐ શક્તિધરાય નમઃ ।

ૐ શત્રુઘ્નાય નમઃ ।

ૐ શિખિવાહનાય નમઃ ।

ॐ શ્રીમતે નમઃ ।
ॐ શિષ્ટાય નમઃ ।
ॐ શુચયે નમઃ ।
ॐ શુદ્ધાય નમઃ । (૯૫૦)
ॐ શાશ્વતાય નમઃ ।
ॐ શ્રુતિસાગરાય નમઃ ।
ॐ શરણ્યાય નમઃ ।
ॐ શુભદાય નમઃ ।
ॐ શર્મણે નમઃ ।
ॐ શિષ્ટેષ્ટાય નમઃ ।
ॐ શુભલક્ષણાય નમઃ ।
ॐ શાન્તાય નમઃ ।
ॐ શૂલધરાય નમઃ ।
ॐ શ્રેષ્ઠાય નમઃ । (૯૬૦)
ॐ શુદ્ધાત્મને નમઃ ।
ॐ શઙ્કરાય નમઃ ।
ॐ શિવાય નમઃ ।
ॐ શિતિકણ્ઠાત્મજાય નમઃ ।
ॐ શૂરાય નમઃ ।
ॐ શાન્તિદાય નમઃ ।
ॐ શોકનાશનાય નમઃ ।
ॐ શૂરસંહારદક્ષાય નમઃ ।
ॐ શિષ્ટાચારપ્રપૂજિતાય નમઃ ।
ॐ ષાણ્માતુરાય નમઃ । (૯૭૦)
ॐ ષણ્મુખાય નમઃ ।
ॐ ષડ્ગુણૈશ્વર્યસમ્યુતાય નમઃ ।
ॐ ષટ્ચક્રસ્થાય નમઃ ।
ॐ ષડૂર્મિઘ્નાય નમઃ ।
ॐ ષડઙ્ગશ્રુતિપારગાય નમઃ ।
ॐ ષડ્ભાવરહિતાય નમઃ ।
ॐ ષટ્કાય નમઃ ।
ॐ ષટ્શાસ્ત્રસ્મૃતિપારગાય નમઃ ।

ૐ ષડ્વર્ગરૂપાય નમઃ ।

ૐ ષડ્ગ્રીવાય નમઃ । (૯૮૦)

ૐ ષડરિઘ્નાય નમઃ ।

ૐ ષડાશ્રયાય નમઃ ।

ૐ ષટ્કિરીટધરાય શ્રીમતે નમઃ ।

ૐ ષડાધારાય નમઃ ।

ૐ ષટ્ક્રમાય નમઃ ।

ૐ ષટ્કોણમધ્યનિલયાય નમઃ ।

ૐ ષણ્ડત્વપરિહારકાય નમઃ ।

ૐ સેનાન્યે નમઃ ।

ૐ સુભગાય નમઃ ।

ૐ સ્કન્દાય નમઃ । (૯૯૦)

ૐ સુરાનન્દાય નમઃ ।

ૐ સતાં ગતયે નમઃ ।

ૐ સુબ્રહ્મણ્યાય નમઃ ।

ૐ સુરાધ્યક્ષાય નમઃ ।

ૐ સર્વજ્ઞાય નમઃ ।

ૐ સર્વગાય નમઃ ।

ૐ સુખિને નમઃ ।

ૐ સુલભાય નમઃ ।

ૐ સિદ્ધિદાય નમઃ ।

ૐ સૌમ્યાય નમઃ । (૧૦૦૦)

ૐ સિદ્ધેશાય નમઃ ।

ૐ સિદ્ધિસાધનાય નમઃ ।

ૐ સિદ્ધાર્થાય નમઃ ।

ૐ સિદ્ધસઙ્કલ્પાય નમઃ ।

ૐ સિદ્ધાય નમઃ ।

ૐ સાધવે નમઃ ।

ૐ સુરેશ્વરાય નમઃ ।

ૐ સુભુજાય નમઃ ।

ૐ સર્વવિદે નમઃ ।

ૐ સાક્ષિણે નમઃ । (૧૦૧૦)

ૐ સુપ્રસાદાય નમઃ ।
ૐ સનાતનાય નમઃ ।
ૐ સુધાપતયે નમઃ ।
ૐ સ્વયઞ્જ્યોતિષે નમઃ ।
ૐ સ્વયમ્ભુવે નમઃ ।
ૐ સર્વતોમુખાય નમઃ ।
ૐ સમર્થાય નમઃ ।
ૐ સત્કૃતયે નમઃ ।
ૐ સૂક્ષ્માય નમઃ ।
ૐ સુમુખાય નમઃ । (૧૦૨૦)
ૐ સુખદાય નમઃ ।
ૐ સુહૃદે નમઃ ।
ૐ સુપ્રસન્નાય નમઃ ।
ૐ સુરશ્રેષ્ઠાય નમઃ ।
ૐ સુશીલાય નમઃ ।
ૐ સત્યસાધકાય નમઃ ।
ૐ સમ્ભાવ્યાય નમઃ ।
ૐ સુમનસ્સેવ્યાય નમઃ ।
ૐ સકલાગમપારગાય નમઃ ।
ૐ સુવ્યક્તાય નમઃ । (૧૦૩૦)
ૐ સચ્ચિદાનન્દાય નમઃ ।
ૐ સુવીરાય નમઃ ।
ૐ સુજનાશ્રયાય નમઃ ।
ૐ સર્વલક્ષણસમ્પન્નાય નમઃ ।
ૐ સત્યધર્મપરાયણાય નમઃ ।
ૐ સર્વદેવમયાય નમઃ ।
ૐ સત્વાય નમઃ ।
ૐ સદામૃષ્ટાન્નદાયકાય નમઃ ।
ૐ સુધન્વને નમઃ ।
ૐ સુમતયે નમઃ । (૧૦૪૦)
ૐ સત્યાય નમઃ ।
ૐ સર્વવિઘ્નવિનાશનાય નમઃ ।

ૐ સર્વદુઃખપ્રશમનાય નમઃ ।
ૐ સુકુમારાય નમઃ ।
ૐ સુલોચનાય નમઃ ।
ૐ સુગ્રીવાય નમઃ ।
ૐ સુશિરસે નમઃ ।
ૐ સારાય નમઃ ।
ૐ સુરારાધ્યાય નમઃ ।
ૐ સુરારિઘ્ને નમઃ । (૧૦૫૦)
ૐ સુવિક્રમાય નમઃ ।
ૐ સર્વવર્ણાય નમઃ ।
ૐ સર્પરાજાય નમઃ ।
ૐ સદાશુચયે નમઃ ।
ૐ સપ્તાર્ચિર્ભુવે નમઃ ।
ૐ સુરવરાય નમઃ ।
ૐ સર્વાયુધવિશારદાય નમઃ ।
ૐ સર્વલોકૈકનાથાય નમઃ ।
ૐ સામ્બારાધનતત્પરાય નમઃ ।
ૐ હસ્તિચર્મામ્બરસુતાય નમઃ । (૧૦૬૦)
ૐ હસ્તિવાહનસેવિતાય નમઃ ।
ૐ હસ્ત્યશ્વવાહનાય નમઃ ।
ૐ હસ્તિને નમઃ ।
ૐ હસ્તદૈત્યહરાનુજાય નમઃ ।
ૐ હકારરૂપિણે નમઃ ।
ૐ હંસાત્મને નમઃ ।
ૐ હલભૃતે નમઃ ।
ૐ હરિપુજિતાય નમઃ ।
ૐ હવિષે નમઃ ।
ૐ હરિદ્રાવર્ણાય નમઃ । (૧૦૭૦)
ૐ હૃતાઘાય નમઃ ।
ૐ હસ્તિતાનનાય નમઃ ।
ૐ હેમભૂષાય નમઃ ।
ૐ હરિદ્વર્ણાય નમઃ ।

ૐ હૃષ્ટિદાય નમઃ ।

ૐ હૃષ્ટિવર્ધનાય નમઃ ।

ૐ હેલાદ્રિવિધ્વંસકારિણે નમઃ ।

ૐ હુઙ્કારહૃતકિલ્બિષાય નમઃ ।

ૐ હિમાદ્રિજાતનૂદ્ભવાય નમઃ ।

ૐ હરિકેશાય નમઃ । (૧૦૮૦)

ૐ હિરણ્મયાય નમઃ ।

ૐ હૃદ્યાય નમઃ ।

ૐ હૃષ્ટાય નમઃ ।

ૐ હરિસખાય નમઃ ।

ૐ હંસાય નમઃ ।

ૐ હંસગતયે નમઃ ।

ૐ હવિષે નમઃ ।

ૐ હિરણ્યવર્ણાય નમઃ ।

ૐ હિતકૃતે નમઃ ।

ૐ હર્ષદાય નમઃ । (૧૦૯૦)

ૐ હેમભૂષણાય નમઃ ।

ૐ હરપ્રિયાય નમઃ ।

ૐ હિતકરાય નમઃ ।

ૐ હતપાપાય નમઃ ।

ૐ હરોદ્ભવાય નમઃ ।

ૐ ક્ષેમદાય નમઃ ।

ૐ ક્ષેમકૃતે નમઃ ।

ૐ ક્ષેમ્યાય નમઃ ।

ૐ ક્ષેત્રજ્ઞાય નમઃ ।

ૐ ક્ષેત્રવર્જિતાય નમઃ । (૧૧૦૦)

ૐ ક્ષેત્રપાલાય નમઃ ।

ૐ ક્ષમાધારાય નમઃ ।

ૐ ક્ષેમ્યાય નમઃ ।

ૐ ક્ષેત્રાય નમઃ ।

ૐ ક્ષમાકરાય નમઃ ।

ૐ ક્ષુત્તૃડ્ઘ્નાય નમઃ ।

ૐ ક્ષાન્તિદાય નમઃ ।

ૐ ક્ષેમિને નમઃ ।

ૐ ક્ષિતિભૂષાય નમઃ ।

ૐ ક્ષમાશ્રયાય નમઃ । (૧૧૧૦)

ૐ ક્ષાલિતાઘાય નમઃ ।

ૐ ક્ષિતિધરાય નમઃ ।

ૐ ક્ષીણસંરક્ષણક્ષમાય નમઃ । (૧૧૧૩)

॥ શ્રીવલ્લીદેવસેનાસમેતશ્રીપ્રસન્નજ્ઞાનશિવસુબ્રહ્મણ્યસ્વામિને નમઃ ॥

શ્રીષણ્મુખ અથવા અધોમુખસહસ્રનામસ્તોત્રમ્ એવમ્ નામાવલિઃ

Prepared by Srikrishnan

---

*Shri Subrahmanya Matrikamalika Sahasranamastotram*

pdf was typeset on December 17, 2022

Please send corrections to *sanskrit@cheerful.com*